~1047

अथसंस्कारप्रयोगकमलाकरपुस्तकप्रारंभोभिधीयते॥

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

श्रीगणेशायनमः॥श्रीरामकृष्णतनयः कमलाकरसंज्ञितः॥श्रीरामंपितरंनत्वासंस्कारान्वक्ति
संप्रतं॥१॥गौतमः॥गर्भाधानंपुंसवनंसीमंतोजातकर्मनामकरणान्नप्राशनंचौलोपन
यनंचत्वारिंशद्व्रतानिस्नानंविवाहःपंचयज्ञाःअष्टकापार्वणश्राद्धंश्रावण्याग्रायणीचै
त्र्याश्वयुजीतिसप्तपाकसंस्थाअग्न्याधेयमग्निहोत्रंदर्शपूर्णमासौचातुर्मास्यान्या
ग्रयणंपशुसौत्रामणीतिसप्तहविर्यज्ञसंस्थाअग्निष्टोमोत्यग्निष्टोम उक्थ्यःषोडशीवा
जपेयोतिरात्रोसोर्यामइतिसप्तसोमसंस्थाइतिचत्वारिंशत्संस्काराः दयाक्षांतिरनसू
यात्रौचमनायासोमांगल्यमकार्पण्यमस्पृहेतियस्यैतेष्टचत्वारिंशत्संस्काराः॥अष्टा

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

त्मगुणाः॥सब्राह्मणः सायुज्यमाप्नोतीति॥चेत्र्यांभूलगवोविष्णुबलिर्गौ॥अन्ये
पंचविंशतिराद्याः निष्क्रमाउक्ताःअन्येःषोडश॥अथस्वस्तिवाचनं॥कर्त्ता॥सुमुखश्चै
कदंतश्चेत्यादिदेशकालौसंकीर्त्यामुककर्मकरिष्ये॥तदंगतयागणेशपूजनंपुण्याहवाचनंमा
तृकापूजनंनांदीश्राद्धंकरिष्यइत्युत्क्वाद्क्षिणोत्तरयोःमहीद्यौरितिमंत्राद्दत्याभूमिंस्पृ
ओषधयःसमितियवान्आकरुरोषितिकुंभोसंस्थाप्येमंमेगंगेतिजलंगंधद्वारामितिग
धं॥याओषधीरितिसर्वौषधीः॥कांडात्कांडादितिदूर्वाअश्वत्थेवेतिपंचपल्लवान्॥
स्योनापृथिवीतिसप्तमृदः॥याःफलिनीरितिफलं॥सहिरत्नानिहिरण्यरूपइतिहेमर्षि

त्वायुवासुवासाइतिवस्त्रेणसूत्रेणवेष्ट्यपूर्णादर्वीतिपूर्णपात्रेनिधायतत्वायामीतिव
रुणंसंपूज्य॥कलशस्यमुखेविष्णुःकंठेरुद्रसमाश्रितः॥मूलेतत्रस्थितोब्रह्ममध्यमा
तृगणास्मृताः॥कुक्षौतुसागराःसर्वेसप्तद्वीपावसुंधरा॥ऋग्वेदोथयजुर्वेदःसामवेदो
ह्यथर्वणः॥अंगैश्चसहिताःसर्वेकलशंतुसमाश्रिताः॥अत्रगायत्रिःसावित्रीशांतिःपुष्टी
करीतथा॥आयांतुममशांत्यर्थंदुरितक्षयकारकाः॥सर्वेसमुद्राःसरितस्तीर्थानिजल
दानदाः॥आयांतुममशांत्यर्थंदुरितक्षयकारकाः॥इतिसंप्रार्थ्य॥मातृदेवोभव॥पितृदेवो
भव॥आचार्यदेवोभव॥अतिथिदेवोभव॥आशिषःप्रार्थयंते॥एताःसत्याःआशिषःसंतु॥अव

निरूतजानुमंडलः कमलमुकुलसदृशमंजलिं शिरस्याधायदक्षिणेनपाणिनासुवर्ण
पूर्णकलशंधारयित्वासकुटुंबोनत्वाजलेस्नापयेत्॥दीर्घानागानद्योगिरयस्त्रीणिविष्णु
पदानिचतेनआयुःप्रमाणेनपुण्याहंदीर्घमायुरस्तु॥शिवाआपःसंतु॥सौमनस्यमस्तु॥
अक्षतंचारिष्टंचास्तु॥गंधाःपांतुसुमंगल्यंचास्तु॥अक्षताःपांतु॥आयुष्यमस्तु॥पुष्पाणि
पांतुसौश्रियमस्तु॥तांबूलानिपांतुऐश्वर्यमस्तु॥दक्षिणाःपांतुब्रह्मदेयंचास्तु॥इतिवि
प्रपुरत्वा॥सर्वयज्ञक्रियाकरणकर्मारंभाःशुभाःशोभनाःप्रवर्तंते॥तमहमोंकारमादिंकृ
त्वा॥ऋग्यजुःसामाथर्ववचनंबह्वृषिमतंसंविज्ञातंभवद्भिरनुज्ञातःपुण्यंपुण्याहंवाचयिष्ये॥

इविणोदाइविणसस्तुरस्यइविणोदाःसनरस्यप्रयंसत्॥इविणोदावीरवतीमिषंनोइविणोदारासतेदीर्घमायुः॥
वाच्यतामितितेरुक्ते॥भद्रंकर्णेभिश्शृणुयामदेवाभद्रंपश्येमाक्षभिर्यजत्राः॥स्थिरैरंगैस्तुष्टु
वांसस्तनूभिर्व्यशेमदेवहितंयदायुः॥सवितापश्चात्तात्सवितापुरस्तात्सवितोत्तरात्तात्सविताधरात्ता
त्॥सवितानःसुवतुसर्वतातिंसवितानोरासतांदीर्घमायुः॥नवोनवोभवतिजायमानोह्नांकेतुरुष
सामेत्यग्रे॥भागंदेवेभ्योविदधात्यायन्प्रचंद्रमास्तिरतेदीर्घमायुः॥ऊर्ध्वादिवंदक्षिणावंतोअस्थुर्ये
अश्वदाःसहतेसूर्येण॥हिरण्यदाअमृतत्वंभजंतेवासोदाःसोमप्रतिरंतआयुः॥आपउंदंतुजी
वसेदीर्घायुत्वायवर्चसे॥यत्त्वात्रदाकीरिणामन्यमानोमर्त्यमर्त्यो जोहवीमि॥जातवेदोमशोअ
स्मासुधेहिप्रजाभिरग्नेअमृतत्वमश्यां॥यस्मैत्वंसुकृतेजातवेदउलोकमग्नेकृणवस्योनं॥अश्वि

नेसपुत्रिणंवीरंवंतंगोमंतंरयिनश्नेस्वस्ति॥संक्षासिंचामियजुषाप्रजामायुर्धनंच॥व्रतनि
यमतपस्वाध्यायक्रतुदमदानविशिष्टानांब्राह्मणानांमनःसमाधीयतां॥समाहितमनस
स्मः॥प्रसीदंतुभवंतः॥प्रसन्नास्मः॥शांतिरस्तु॥पुष्टिरस्तु॥तुष्टिरस्तु॥अविघ्नमस्तु॥आ
युष्यमस्तु॥आरोग्यमस्तु॥शिवंकर्मास्तु॥कर्मसमृध्यिरस्तु॥वेदसमृध्यिरस्तु॥शास्त्रसमृ
ध्यिरस्तु॥पुत्रसमृध्यिरस्तु॥धनधान्यसमृध्यिरस्तु॥इष्टसंपदस्तु॥बहिर्दोअरिष्टनिरशनम
स्तु॥यत्पापंतत्प्रतिहतमस्तु॥यद्भद्रंतदस्तु॥उत्तरेकर्मण्यविघ्नमस्तु॥उत्तरोत्तरमहरहरभि ४
वृध्यिरस्तु॥उत्तरोत्तराःक्रियाःशुभाःशोभनाःसंपद्यंतां॥तिथिकर्णमुहूर्तनक्षत्रसंपदस्तु॥

तिथिकर्णमुहूर्तनक्षत्रग्रहलग्नाधिदेवताःप्रीयंतां॥तिथिकरणेमुहूर्तनक्षत्रेसगृहेसदेवतेप्रीये
तां॥दुर्गापांचांत्योप्रीयेतां॥अग्निपुरोगाविश्वेदेवाःप्रीयंतां॥इंद्रपुरोगामरुद्गणाःप्रीयंतां॥ब्रह्म
पुरोगासर्वेवेदाःप्रीयंतां॥विष्णुपुरोगासर्वेदेवाःप्रीयंता॥माहेश्वरीपुरोगाउमामातरःप्रीयंतां॥वसि
ष्ठपुरोगाऋषिगणाःप्रीयंतां॥अरुंधतीपुरोगाएकपत्न्यःप्रीयंतां॥ऋषयश्छंदांस्याचार्यावेदादे
वायज्ञाश्चप्रीयंतां॥ब्रह्मचब्राह्मणाश्चप्रीयंतां॥श्रीसरस्वत्योप्रीयेतां॥श्रद्धामेधेप्रीये
तां॥भगवतीकात्यायनीप्रीयतां॥भगवतीमाहेश्वरीप्रीयतां॥भगवतीपुष्टिकरीप्रीयतां॥भग
वतीतुष्टिकरीप्रीयतां॥भगवतीवृध्यिकरीप्रीयतां भगवतीऋध्यिकरीप्रीयतां॥भगवंतोविघ्न

विनायकोप्रीयेतां॥भगवान्स्वामीमहासेनःसपत्नीकःससुतःसपार्षदःसर्वेस्थानगतःप्रीय
तां॥हरिहरहिरण्यगर्भाःप्रीयंतां॥सर्वेग्रामदेवताःप्रीयतां॥सर्वाःकुलदेवताःप्री॰॥सर्वाइष्ट
देवताःप्रीयंतां॥बहिःहताब्रह्मद्विषः॥हताःपरिपंथिनः॥हतास्यकर्मणोविघ्नकर्तारः॥शत्रु
वःपराभवंयंतु॥शाम्यंतुघोराणि॥शाम्यंतुपापानि॥शाम्यंतीतयः॥शुभानिवर्धंतां॥शिवा
आपःसंतु॥शिवाऋतवःसंतु॥शिवाअग्नयःसंतु॥शिवाओषधयःसंतु॥शिवावनस्पतयःसं
तु॥शिवाअतिथयःसंतु॥अहोरात्रेशिवेस्यातांनिकामेनिकामेनःपर्जन्योवर्षतु॥फलिन्यो
नओषधयःपच्यंतां॥योगक्षेमोनःकल्पतां॥शुक्रांगारकबुधबृहस्पतिशनैश्चरराहुकेतु

सोमसहितआदित्यपुरोगाःसर्वेग्रहाःप्रीयंतां॥भगवांनारायणःप्रीयतां॥भगवान्पर्जन्यः
प्रीयतां॥भगवान्स्वामीमहासेनःपुण्याहकालान्वाचयिष्ये॥वाच्यंतां॥ऊर्ध्वंतेवशकुनेसाम
गायसिब्रह्मपुत्रइवसवनेषुशंससि॥इषेवाजीशिभुमतीरपीत्यासर्वतोनःशकुनेभद्रंमा
वरविश्वतोनःशकुनेपुण्यमावद॥याज्ययायजतिप्रत्तिर्वैयाज्यापुण्येवलक्ष्मीःपुण्यामे
वतेलक्ष्मीसंभावयतिपुण्यांलक्ष्मींसंस्कुरुते॥यत्पुण्येनक्षत्रे॥नहदृष्टकुर्वीतोपस्पृष्ट॥यदावै
सूर्योदेति॥अथनक्षत्रंनेति॥तावतितत्रसूर्योगच्छत्॥यत्रजघन्यंपश्येत्॥तावतिकुर्वीत
पत्कारीस्यात्॥पुण्याहएवकुरुते॥तानिवाएतानि॥यवनक्षत्राणि॥यान्येवदेवनक्षत्राणि॥

तिषुकुर्वतयत्कारीस्यात्॥पुण्याहंवाचयिष्यन्कुरुते॥मह्यंसहकुटुंबिनेमहाजनानमस्कुर्वाणाय
आशीर्वचनमपेक्षमाणायामुककर्मणःपुण्याहंभवंतोब्रुवंतु॥इतित्रिः॥पुण्याहमितिविप्राः
ॐस्वस्तयेवायुमुपब्रवामहेसोमंस्वस्तिभुवनस्ययस्पतिः॥बृहस्पतिंसर्वगणंस्वस्तयेस्वस्त
यआदित्यासोभवंतुनः॥आदित्यउदयनीयःपथ्यायेवेतस्वस्त्याप्रयंतिपथ्यांस्वस्तिमभ्युद्यं
तिस्वस्त्येवेतःप्रयंतिस्वस्त्युद्यंतिस्वस्त्युद्यंति॥स्वस्तिनइंद्रोबृहच्छ्रवाःस्वस्तिनःपूषाविश्ववेदाः॥
स्वस्तिनस्तार्क्ष्योअरिष्टनेमिःस्वस्तिनोबृहस्पतिर्दधातु॥अष्टौदेवावसवःसोम्यासः॥चतस्रो
देवीरजराअमर्त्याः॥तेयज्ञंपांतुरजसःपरस्तात्॥संवत्सरेणममृतंस्वस्ति॥मह्यमित्यादि॰
कर्मणःस्वस्तिभवंतो॰त्रिः॥आयुष्मतेस्वस्तीतिविप्राः॥ॐऋध्यामस्तोमंसनुयामवाजमानो

मंत्रंसरथेहोपयाते॥यज्ञोनपक्वंमधुगाषंतराभूतोशोअश्विनोःकाममप्राः॥सर्वामृत्यिमृध्युय
मितिनंवेतेनसेवपुरस्तात्सर्यभवंतोभिर्मध्यतोसेरुपरिष्टाद्यत्र्यासर्वतोद्वारशाहंपरिभू
यसर्वामृत्यिमाप्नोत्सर्वामृत्यिमृध्नोतियएवंवेद॥ऋध्यामहव्येनमसोपसद्य॥मित्रंदेवंमित्रधे
येनोअस्तु॥अनुराधान्हविषावर्धयंतः॥शतंजीवेमशरःसवीराः॥त्रीणित्रीणिवेदेवानामृध्राणि॥
त्रीणिछंदांसित्रीणिसवनानि॥त्रयइमेलोकाः॥ऋध्यामेवतद्दीर्घयज्ञोकेपुप्रतितिष्ठति॥मह्य
मित्यादि॰॥कर्मणःऋध्यंभवं॰त्रिः॥ऋध्यतामितिविप्राः॥ॐश्रियेजातश्रियआनिर्यायश्रि
यंवयोजरितृभ्योदधाति॥श्रियंवसानाअमृतत्वमायन्भवंतिसत्यासमिधामितद्दौ॥श्रियए

वेनेनक्षियामादधातिसंततमृचावषट्कृत्यंसंतत्यैसंधीयतेप्रजयापशुभिर्यएवंवेद॥
यस्मिन्ब्रह्माभ्रजयत्सर्वमेतत्॥अमुंचलोकमिदमुचसर्वं॥तन्नोनक्षत्रमभिजिद्भवि
त्या॥श्रियंदधात्वनपजायमानं॥अहेबुध्नियमंत्रंमेगोपाय॥यमृषयस्त्रैविद्याविदुः॥ऋचः
सामानियजूंषि॥साहिश्रीरमृतासतां॥मत्यमित्यादि॥कर्मणःश्रीरस्त्वितित्रिः॥अ
स्तुश्रीरितिविप्राः॥कंभाजलपानयेत्॥वर्षशतंपूर्णमस्तु॥शिवंकर्मास्तु॥गोत्राभिवृद्धि
रस्तु॥प्रजापतिःप्रीयतां॥शुक्रेभिरंगैरजातंतन्वानंक्रतुंपुनानःकविभिःपवित्रैः॥शोचि
र्वसानःपरियासिरक्षांश्रियोमिमीतेबृहतीरनूनाः॥तदप्येषश्लोकोभिगीतोमरुतःपरिवे

ष्टारोमरुत्तस्यावसंगृहे॥आविक्षितस्यकामप्रेविश्वेदेवाःसभासदइति॥ततःकलशाद्वयंध
पातयेत्॥वास्तोष्पतेप्रतिजानीह्यस्मान्त्स्वावेशोअनमीवोभवानः॥यत्वेमहेप्रतितन्नोजु
षस्वशन्नोभवद्विपदेशंचतुष्पदे॥वास्तोष्पतेप्रतरणोनएधिगयस्फानोगोभिरश्वेभिरिंदो
अजरासस्तेसख्येस्यामपितेवपुत्रान्प्रतिनोजुषस्व॥वास्तोष्पतेशग्मयासंसदातेसक्षीम
हिरण्वयागातुमत्या॥पाहिक्षेमउतयोगेवन्नोयूयं॥अमीवहावास्तोष्पतेविश्वारूपाण्याविः
शन्॥सखासुशेवएधिनः॥शिवंशिवंवदेत्॥ततोअभिषेकः॥तन्नपत्नीवामनः॥ॐसमुद्रज्ये
ष्ठाःसलिलस्यमध्यात्पुनानायंत्यनिविशमानाः॥इंद्रेयावज्रीवृषभोरराद॒दाआपोदेवीरिह

मामवंतु॥ याआपोदिव्याउतवास्रवंतिखनित्रिमाउतवायास्वयंजाः॥ समुद्रार्थायाःशु
चयःपावकास्ताआपोदेवी॥ यासोराजावरुणोयातिमध्येसत्यानृतेअवपश्यंजनानां॥ मधु
श्चुतःशुचयोयाःपावकास्ताआपो॥ यासुराजावरुणोयासुसोमोविश्वेदेवायासूर्जंमदं
ति॥ वैश्वानरोयाअग्निःप्रविष्टस्ताआपो॥ त्रायंतामिहदेवास्त्रायंतामरुतांगणः॥ त्रा
यंतोविश्वाभूतानियथायमरपाअसत्॥ आपइद्वाउभेषजीरापोअमीवचातनीः॥ आ
पःसर्वस्यभेषजीस्तास्तेकृण्वंतुभेषजं॥ हस्ताभ्यांदशशाखाभ्यांजिह्वावाचःपुरोग
वी॥ अनामयित्नुभ्यांत्वाताभ्यांत्वोपस्पृशामसि॥ इमाआपःशिवतमाइमाःसर्वस्यभेषजी॥

याभिरिंद्रमभ्यषिंचन्बृहस्पतिःसोमंराजानंवरुणंयमंमनुं॥
इमाएष्टस्यवर्धनीरिमाएष्टभूतोमृताः॥ ताभिरिंद्रमभिषिंचामित्वामहेंद्रोत्वमधिराजोभवेह॥
महांतंत्वामहीनांसम्राजंचर्षणीनांदेवीजनित्र्यजीजनद्भद्राजनित्र्यजीजनत्॥ देवस्यत्वासवितुःप्र
सवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यामग्नेस्तेजसासूर्यस्यवर्चसेंद्रस्येंद्रियेणाभिषिंचामि॥ बलायश्रि
येयशसेन्नाद्यायः भूर्भुवस्वःअमृताभिषेकोस्तु॥ इंद्रियंवाखंडं०॥ सुरास्तेतिच॥०॥ ननःपीत्वेच
नुर्विशंतिपुंजेषु॥ गौरीपद्मानीमेधासावित्रीविजयाजया॥ देवसेनास्वधास्वाहामातरोलोक
मातरः॥ धृतिःपुष्टिस्तथातुष्टीरात्मनःकुलदेवता॥ ब्राह्मीमाहेश्वरीचैंद्रीवैष्णवीतथा॥
वाराहीचतथेशाणीचामुंडाःसप्तमातरः॥ गणपत्यादिगौर्यादिषोडशमातृः ब्राह्म्यादिसप्तमा

नृ:दुर्गाक्षेत्रपालगणाधिपाभ्यांवाद्यघोषैरुपचारैःसंपूज्य॥आवाहनंनजानामि०मंत्रहीनमितिसंप्रार्थ्यदक्षिणाग्रंकुर्यात्॥ ॥सत्यवसुसंज्ञिकाविश्वेदेवाःनांदीमुखाःभूर्भुवःस्वःइदंवःपाद्यंस्वाहानमममेदंचदक्षिणेतिसाक्षतंजलंक्षिपेत्॥मातृपितामहीप्रपितामह्यःनांदीमुखाः०॥पितृपितामहप्रपितामहाःनांदीमुखाः०॥मातामहमातुःपितामहमातुःप्रपितामहाःनांदीमुखाःइदंवःपाद्यं०॥पुनःसत्यवसुस्त्वित्यादि०इदंवःआसनगंधाद्युपचारकल्पनंस्वाहानममदेयंचदक्षिणेः॥एवंमात्रादीपित्रादीमातामहादीनांच०॥पुनःसत्यवस्त्वित्यादि०इदंवःदास्यमानंयुग्मब्राह्मणभोजनपर्याप्तंमन्नंनन्निष्क्रयभूतद्रव्यंस्वाहानममदेयंचदक्षिणेः॥एवं

पत्नीसहितं

मात्रादीपित्रादीमातामहादीनांच०गणपत्यादिगौर्यादिषोडशमातरःब्राह्म्यादिसप्तमातरश्चनांदीमुखब्राह्मणभोजनपर्याप्तंमन्नंनन्निष्क्रयभूतद्रव्यंस्वाहानमम॥ततः॥उपास्मैगायतानरःपवमानायेंदवे॥अभिदेवांइयक्षते॥अभित्वमूनापवोथर्वाणोअग्निंश्रयुः॥रेवंरेवायदेवयु॥सनःपवस्वशंगवेशंजनायशंमयते॥शंराजंनोषधीभ्यः॥वन्मवेनुखनवसेरणायरिविस्रुहे॥सोमायंगायमर्चत॥हस्रव्यंतेभिरद्रिभिःसुतंसोमंपुनीतन॥मधावाधावतामधु॥अस्मन्नमीमदंतस्यप्रियाअधूषत॥अस्तोषतस्वभानवोविप्रानविष्टमतीयोजान्विंद्रतेहरी॥कृतस्यनांदीश्राद्धाख्यस्यकर्मणःयावत्फलसिध्यर्थंदासामलकंनिष्क्रयभूतंयथाशक्तिद्रव्यंदक्षिणात्वे

नस्वाहानममइयंचऋषिः॥प्रजापतेनत्वेतान्यन्योविश्वाजातानिपरिताबभूव॥यत्कामास्तेजुहु
मस्तन्नोअस्तुवयंस्यामपतयोरयीणां॥अनेननांदीश्राद्धेननांदीमुखदेवताःप्रीयंतांऋषिः॥मा
तापितामहीचैवतथैवप्रपितामही॥पितापितामहश्चैवतथैवप्रपितामहः॥मातामहस्तत्सिता
चप्रमातामहकारयः॥एतेभवंतुमेप्रीताःप्रयछंतुचमंगलं॥ॐइदंकामग्नेपुरुदंससनिंगोःशश्वत्तमं
हवमानायसाध॥स्यान्नःसूनुस्तनयोविजावाग्नेसातेसुमतिर्भूत्वस्मे॥इतिपात्रेशब्दंकृत्वा॥उदि
ष्वब्रह्मणस्पतेदेवयंतस्त्वेमहे॥उपप्रयंतुमरुतःसुदानवइंद्राशुर्भवासचा॥अभ्यारमिरद्योनि
षिक्तंपुष्करेमधु॥अवतस्यविसर्जने॥यांतुदेवगणाःसर्वेपूजामादायपार्थिवीं॥इष्टकामप्रसिध्य

र्थंपुनरागमनायच॥ ॥इतिकमलाकरभट्टकृतपुण्याहवाचननांदीश्राद्धप्रयोगः॥ ॥अथदु
ष्टरजोदर्शनशांतिः॥पितृकृता॥ ॥कर्ताममपत्न्याःप्रथमरजोदर्शनेदुष्टमासादितिथिनक्ष
त्रादिस्मृचितसर्वारिष्टशांत्यर्थंसनवग्रहमखांशेनकोत्कारजोदर्शनशांतिंकरिष्ये॥इतिसं
कल्प्यगणेशपूजानांदीश्राद्धंकृत्वाचार्यमृत्विजश्चवृणुयात्॥आचार्यः॥ऐशानेमध्येदक्षि
णोत्तरयोश्चसर्वत्रमंत्रावृत्तिः॥महीद्यौरितिभूमिंस्पृस्वा॥ओषधयःसमितिद्रोणप्रमाणत्री
हिराशित्रयेआकलशेषितिकुंभत्रयंसंस्थाप्य॥प्रसुवआपइतिनवानांसिंधुसिक्तेयमेधोनद्यो
जगमी॥प्रसुवआपोमरिमानमुत्तमंकारवेचातिसरेषिवस्तनः॥प्रसत्तसत्तन्नेधाहिचक्रमुःप्र

स्त्वरीणामतिसिंधुरोजसा॥प्रतेरदद्रुणोयातवेपथःसिंधोयदाजमभ्यद्रवस्त्वं॥भूम्याअधिप्र
वतायासिसानुनायदेषामग्रेजगतामिरज्यसि॥रिवस्तनोयतनेभूम्यापर्यनंतंशुष्मंमुद्यतिर्भा
नुना॥अभ्रादिवप्रस्तनयंतिशुष्मयःसिंधुर्यदेतिवृषभोनरोरुवत्॥अभित्वासिंधोशिशुमिंनमातरो
वाश्राअर्षंतिपयसेवधेनवः॥राजेवयुध्वानयसिसमिद्धोयदासामग्रंप्रवतामिनक्षसि॥इमं
मेगंगेयमुनेसरस्वतिशुतुद्रिस्तोमंसचतापरुष्ण्या॥असिक्न्यामरुद्वृधेवितस्तयार्जीकीयेशृ
ण्व्यासुषोमया॥याःप्रवतोनिवतउद्वतउदन्वतीरनुरकाःश्वयाः॥ ताअस्मभ्यंपयसापिन्वमानाःशिवादेवीरशिपदाभवंतुसर्वानद्योअशि

मिदाभवंतु॥आभ्यांजलेनापूर्य॥गंधद्वारामितिगंधं॥याओषधीरितिसर्वौषधीः॥याओ
षधीःपूर्वाजातादेवेभ्यस्त्रियुगंपुरा॥मनैनुबभ्रूणामहंशतंधामानिसप्तच॥ओषधयः
संवदंतेसोमेनसहराज्ञा॥यस्मैकृणोतिब्राह्मणस्तंराजन्पारयामसि॥यवाश्चमेषुक्षिप्ताम
ध्यकंमेयवन्नीहितिलमाषकंगुश्यामाकमुद्गान्क्षिप्त्वा॥गायत्र्योदुंबरकुशइर्वारुकोश
लवंपकबिल्वविल्वकोनतुलसीबर्हिषीशंखपुष्पीशतावर्यश्वगंधानिर्गुंडीरक्तपीतस
र्षपापामार्गपलाशपनसबंधुकप्रियंगुगोधूमन्नीव्यश्वत्थदधिदुग्धघृतपद्मपत्रनीलोस
पीत लसितरक्तकुरंटकगुंजावचाभद्रमुस्तकारव्यानिद्वात्रिंशदौषधानियथासंभवंक्षिपेत्॥

ॐ कांडात्कांडात्प्ररोहंतिपरुषःपरुषःपरि॥एवानोदूर्वेप्रतनुसहस्रेणशतेनच॥ततःमिषु
कांडात्कांडात्प्रिनिदूर्वा॥ॐअश्वत्थेवोनिषदनंपर्णेवोवसतिष्कृता॥गोभाजइत्किलासथय
त्सनवथपूरुषं॥इतिपंचपल्लवान्॥ॐस्योनापृथिविभवानृक्षरानिवेशनी॥यछानःशर्मस
प्रथाः॥इतिसप्तमृदा॥ॐयाःफलिनीर्याअफलाअपुष्पायाश्चपुष्पिणीः॥बृहस्पतिप्रसूतास्ता
नोमुंचंत्वंहसः॥इतिफलं॥ॐसहिरत्नानिदाशुषेसुवातिसविताभगः॥तंभागंचित्रमीमहे॥इ
तिपंचरत्नानि॥ॐहिरण्यरूपंःसहिरण्यसंदृगपानपात्सेदुहिरण्यवर्णः॥हिरण्ययासप्रियोनेनि १२
षद्याहिरण्यदादद्मेनमस्मे॥इतिहिरण्यंक्षिप्त्वा॥ॐपुवासुवासाःपरिवीतआगात्सउश्रेया

न्भवतिजायमानः॥तंधीरासःकवयउन्नयंतिस्वाध्योमनसादेवयंतः॥वस्त्रेणावेष्य॥ॐ
पूर्णादर्विपरापतसुपूर्णापुनरापत॥वस्नेवविक्रीणावहाइषमूर्जंशतक्रतो॥पूर्णपात्राणि
सवस्त्राणिनिधाय॥तत्राष्टदलानिकृत्वा॥मध्ये॥गायत्र्याविश्वामित्रोभुवनेश्वरीगायत्री
तत्सवितुर्वरेण्यंभर्गो॥इतिदक्षिणकुंभे॥इंद्राणीदृषाकपिरिंद्राणीपंक्तिः॥ॐइंद्राणीमासुनारिषु
सुभगामहमश्रवं॥नह्यस्याअपरंचनजरसामरतेपतिर्विश्वस्मादिंद्रउत्तरः॥उत्तरकुंभे॥
इंद्रत्वाविश्वामित्रइंद्रोगायत्री॥ॐइंद्रत्वादृषभंवयंसुतेसोमेहवामहे॥सपाहिमध्वोअंध
सः॥इतींद्रमावाह्य॥तत्तन्मंत्रैःषोडशोपचारैःसंपूज्य॥ततोमध्यकुंभंस्पृष्ट्वागायत्रीम

ष्टसहस्रंअष्टशतंवाजपेय॥ हिरण्यवर्णा—मिनिपंचदशानांकर्दमानंदचिक्लीतेंदिरासुताऋ
षयः॥श्रीर्देवतास्त्रिष्टुभः॥एकाप्रस्तारपंक्तिः॥द्वेत्रिष्टुभौत्याप्रस्तारपंक्तिः॥सूक्तज
पेविनियोगः॥ॐ हिरण्यवर्णांहरिणींसुवर्णरजतस्रजां॥चंद्रांहिरण्मयींलक्ष्मीजातवेदोमआ
वह॥तांमआवहजातवेदोलक्ष्मीमनपगामिनीं॥यस्यांहिरण्यंविंदेयंगामश्वंपुरुषानहं॥
अश्वपूर्णांरथमध्याहस्तिनादप्रमोदिनीं॥श्रियंदेवीमुपह्वयेश्रीर्मादेवीर्जुषतां॥कांसोस्मि
तांहिरण्यप्राकारमार्द्रज्वलंतींतृप्तांतर्पयंतीं॥पद्मेस्थितांपद्मवर्णांतामिहोपह्वयेश्रियं॥चं
द्रांप्रभासांयशसाज्वलंतींश्रियंलोकेदेवजुष्टमुदारां॥तांपद्मनेमिंशरणमहंप्रपद्येअलक्ष्मीर्मे १३

नश्यतांत्वांवृणोमि॥१॥आदित्यवर्णेतपसोधिजातोवनस्पतिस्तववृक्षोथबिल्वः॥तस्यफ
लानितपसानुदंतुमायांतरायाश्चबाह्याअलक्ष्मीः॥उपैतुमांदेवसखःकीर्तिश्चमणिना
सह॥प्रादुर्भूतोसुराष्ट्रेस्मिन्कीर्तिमृद्धिंददातुमे॥क्षुत्पिपासामलांज्येष्ठामलक्ष्मीनाशया
म्यहं॥अभूतिमसमृद्धिंचसर्वान्निर्णुदमेगृहात्॥गंधद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीं॥
ईश्वरींसर्वभूतानांतामिहोपह्वयेश्रियं॥मनसःकाममाकूतिंवाचःसत्यमशीमहि॥पशूनां
रूपमन्नस्यमयिश्रीश्रयतांयशः॥२॥कर्दमेनप्रजाभूतामयिसंभ्रमकर्दम॥श्रियंवासयमे
कुलेमातरंपद्ममालिनीं॥आपस्रजंतुस्निग्धानिचिक्लीतवसमेगृहे॥नीचदेवीमातरंश्रियंवा

सयमेकुले॥आदंपुष्करिणींपुष्टींसुवर्णांहेममालिनीं॥सूर्यांहिरण्मयींलक्ष्मीजातवेदोममाव
वह॥आदंपः करिणींयष्टींपिंगलांपद्ममालिनीं॥चंद्रांहिरण्मयींलक्ष्मीजातवेदोममावह॥
तांमआवहजातवेदोलक्ष्मीमनपगामिनीं॥यस्यांहिरण्यंप्रभूतंगावोदास्योश्वान्विंदेयं
पुरुषानहं॥यःशुचिःप्रयतोभूत्वाजुहुयादाज्यमन्वहं॥श्रियःपंचदशंचैवश्रीकामःस
ततंजपेत्॥३॥एकोऋत्विकुदक्षिणकुंभे॥रुद्रसू॰जपेत्॥कद्रुद्रायेतिनवार्णोघोरःकण्वो
रुद्रोगायत्री॥ॐकद्रुद्रायप्रचेतसेमीढुष्टमायतव्यसे॥वोचेमशंतमंहृदे॥यथानोअदि
तिःकरत्पश्वेनृभ्योयथागवे॥यथानोमित्रोवरुणोयथारुद्रश्चिकेतति॥यथाविश्वेसजोषसः॥गाथपतिंमेधपतिंरुद्रंजलाषमेषजं॥तच्छंयोःसुम्नमीमहे॥यःशु
क्रइवसूर्योहिरण्यमिवरोचते॥श्रेष्ठोदेवानांवसुः॥शंनःकरत्यर्वतेसुगंमेषायमेष्येनृभ्योनारि
भ्योगवे॥अस्मेसोमश्रियमधिनिधेहिशतस्यनृणां॥महिश्रवस्तुविनृम्णं॥मानःसोमपरिबा
धोमारातयोजुहुरंत॥आनइंदोवाजेभव॥यास्तेप्रजाअमृतस्यपरस्मिन्धामन्नृतस्य॥मूर्धानं
नासोमवेनआभूषंतीःसोमवेदः॥२॥इमारुद्रायतवसेकपर्दिनेक्षयद्वीरायप्रभरामहेमतिं॥यथाशमसद्वि
पदेचतुष्पदेविश्वंपुष्टंग्रामेअस्मिन्ननातुरं॥मृळानोरुद्रोतनोमयस्कृधिक्षयद्वीरायनमसा

विधेमते॥यच्चयोश्चमनुराये जेपितरद्यामतवरुद्रप्रणीतिषु॥अद्यामतेसुमतिंदे
वयज्ययाक्षयद्वीरस्यतवरुद्रमीढ्वः॥सुम्नायन्निद्विशोअस्माकमाचरारिष्टवीरजुहवा
मतेहविः॥तेषंवयंरुद्रियंसाधंवंकुंकविमवसेनिह्वयामहे॥ओषुअस्मेदेव्यंहेळोअस्यतुस
मतिमिद्वयमस्याद्दणीमहे॥दिवोवराहमरुषंकपर्दिनंतेषंरूपंनमसानिह्वयामहे॥हस्तेबि
भ्रद्भेषजावार्योपिशर्मवल्गुर्दिरस्मभ्यंयंसत्॥१॥इदंपित्रेमरुतामुच्यतेवचःस्वादोस्वादीयो
रुद्रायवर्धनं॥यस्वाचनोअमृतमर्तभोजनंत्मनेतोकायतनयायमृळ॥मानोमहांतु
तमानोअर्भकंमानउक्षंतउतमानउक्षितं॥मानोवधीःपितरंमोतमातरंमानःप्रियास्तन्वो

रुद्रीरिषः॥मानस्तोकेतनयेमानआयोमानोगोषुमानोअश्वेषुरीरिषः॥वीरान्मानो
रुद्रभामितोवधीर्हविष्मंतःसदमित्वाहवामहे॥उपतेस्तोमान्पशुपाइवाकरंरास्वापि
तर्मरुतांसुम्नमस्मे॥भद्राहितेसुमतिर्मृळयत्तमाथावयमवस्तेद्दणीमहे॥अरितेगो
ग्घमुतपूरुषघ्नंक्षयद्वीरसुम्नमस्मेतेअस्तु॥मृळाचनोअधिवोचाहिदेवाधाचनःश
र्मयच्छद्विबर्हाः॥अवोचामनमोअस्माअवस्यवःशृणोतुनोहवंरुद्रोमरुत्वान्॥तन्नो
मित्रोवरुणोममंहतामदितिःसिंधुःपृथिवीउतद्यौः॥२॥आतेपितरुतिंपंचदशानांकृत्स
मरोरुद्रस्त्रिष्टुप्॥जपे०॥ॐआतेपितर्मरुतांसुम्नमेतुमानःसूर्यस्यसंदृशोयुयोथाः॥

अभिनोवीरेअर्वतिक्षमेतप्रजायेमहिरुद्रप्रजाभिः॥वादत्तेमीरुद्रशंतमेभिःशतंहिमाअशी
पमेषजेभिः॥व्याएस्मद्देषोवितरंव्यंहोव्यमीवाश्चातयस्वाविषूचीः॥श्रेष्ठोजातस्यरुद्रश्रिया
सितवस्रमस्तवसावज्रबाहो॥पर्षिणःपारमंहसःस्वस्तिविश्वाअभीतीरपसोयुयोधि॥मावा
रुद्रुक्रुधामानमोभिर्मादुष्कृतौवृषभमासहूती॥उन्नोवीराँअर्पयभेषजेभिर्भिषक्तमंत्वाभिष
जांशृणोमि॥क्वीमभिर्ववतेयाहविर्भिरवस्तोमेभीरुद्रंदिषीय॥कथारुद्रःसुहवोमानोअस्य
वस्तुसुधितोरीरधन्ननायै॥२॥उन्मामंदन्वृषभोमरुत्वांस्वासीयसावयसानाधमाने॥घृणा

च्छायामरपाअशीयाविवासेयंरुद्रस्यसुम्नं॥कंरुद्रेतोमृळयाकुरस्तोयोअस्तिभेषजोज

लाषः॥अपभर्तोरपसोदैव्यस्याभीनुमावृषभचक्षमीथाः॥प्रबभ्रवेवृषभायश्वितीचेमहो
हीसुष्टुतिमीरयामि॥नमस्याकन्नमसाकिनंनमोभिर्गृणीमसित्वेपरुद्रस्यनाम॥स्थिरेभिरंगैःपु
रुरूपउग्रोबभ्रुःशुक्रेभिःपिपिशेहिरण्यैः॥ईशानादस्यभुवनस्यभूरेर्नवाय्योषद्रुद्रसुर्यः॥
अर्हन्बिभर्षिसायकानिधन्वार्हन्निष्कंयजतंविश्वरूपं॥अर्हन्निदंदयसेविश्वमभ्वंनवाओजीयो
रुद्रत्वदस्ति॥स्तुहिश्रुतंगर्तसदंयुवानंमृगंनभीममुपहत्नुमुग्रं॥मृळाजरित्रेरुद्रस्तवानो
न्यंतेअस्मन्निवपंतुसेनाः॥कुमारश्चित्पितरंवंदमानंप्रतिनानामरुद्रोपयंता॥भूरेर्दाताँसस
तिंगृणीबिस्तुतस्त्वंभेषजारास्यस्मे॥यावोभेषजामरुतःशुचीनियाँशंतमाहृषणोयामयोभु॥

यानिमनुरवृणीतापितानस्तांश्चयोश्चरुरस्यवक्षि॥परिणोहेतीरुरुस्यरज्याःपरित्वेषस्यदुर्म
तिमंहीगात्॥अवस्थिरामघवञ्छस्तनुष्वमीदुस्तोकायतनयायमृळ॥एवाबन्नोवृषभश्चेकितान
यथादेवनरणीषेनहंसि॥हवनश्रुन्नोरुद्रेहबोधिबृहद्वदेमविदथेसुवीराः॥२॥इमारुद्रायस्थि
रधन्वनेगिरःक्षिप्रेषवेदेवायस्वधाव्ने॥अषाकायसहमानायवेधसेतिग्मायुधायभरताशृणो
तुनः॥सहिक्षयेणक्षम्यस्यजन्मनःसाम्राज्येनदिव्यस्यचेतति॥अवंनवंतीरुपनोदुरश्चरान
मीवोरुद्रजासुनोभव॥यानेरिपुंवसवःपित्वइस्मयाचरतिपरिषूतपाशुनः॥सहस्रंते
षुपिशातभेषजामानस्तोकेषुतनयेषुरीरिषः॥मानोवधीरुद्रमापराद्मातेभूमप्रसितोहीळि

तस्य॥आनोभजबर्हिषिजीवशंसेयूंपातस्वस्तिभिःसदानः॥आवोराजानंवामेसोरुद्रंहुव
ष्टुप्॥जपे०॥ॐआवोराजानमध्वरस्यरुद्रंहोतारंसत्ययजंरोदस्योः॥अग्निंपुरानयथि
लोरविन्ताधियण्यरूपमवसेकृणुध्वं॥तमुष्टुहिभोमोरुद्रंत्र्यष्टुप्॥जपे०॥ॐतमुष्टुहिय
स्त्विषुःसुधन्वायेविश्वस्यक्षयतिभेषजस्य॥यक्ष्वामहेसौमनसायरुद्रंनमोभिर्देवमसुरं
वस्य॥मुवनस्यपितरंगीर्भिराभीरुद्रंदिशावर्धयारुद्रमक्तौ॥बृहंतमृष्वमजरंसुषुम्नमृधग्
घुवेमकविनेषितासः॥त्र्यंबकंयजामहेसुगंधिंपु
ष्टिवर्धनं॥उर्वारुकमीवबंधनान्मृत्योर्मुक्षीयमामृतात्॥अथास्योत्तरकुंभेरुद्रैकादशिनो

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

न्यासपूर्वकंजपेत्॥ॐशंनइंद्राग्नीभवतामवोभिःशंनइंद्रावरुणारातहव्या॥शमिंद्रासोमा
सुविताययंयोःशंनइंद्रपूषणावाजसातौ॥शंनोभगःशमुनःशंसोअस्तुशंनःपुरंधिःशमु
संतुरायः॥शंनःसत्यस्यसुयमस्यशंसःशंनोअर्यमापुरुजातोअस्तु॥शंनोधातारमुधर्त
नोअस्तुशंनउरूचीभवतुस्वधाभिः॥शंरोदसीबृहतीशंनोअद्रिःशंनोदेवानांसुहवानिसंतु॥
शंनोअग्निर्ज्योतिरनीकोअस्तुशंनोमित्रावरुणावश्विनाशं॥शंनःसुकृतांसुकृतानिसंतु
शंनइषिरोअभिवातुवातः॥शंनोद्यावापृथिवीपूर्वहूतौशमंतरिक्षंदृशयेनोअस्तु॥शंनओ
षधीर्वनिनोभवंतुशंनोरजसस्पतिरस्तुजिष्णुः॥१॥शंनइंद्रोवसुभिर्देवोअस्तुशमादित्येभि

वरुणःसुशंसः॥शंनोरुद्रोरुद्रेभिर्जलाषःशंनस्त्वष्टाग्नाभिरिहःशृणोतु॥शंनःसोमोभवतुब्रह्म
शंनःशंनोग्नावाणःशमुसंतुयज्ञाः॥शंनःस्वरूणामितयोभवंतुशंनःप्रस्रवःशमवस्तुवेदिः॥शं
नःसूर्यउरुचक्षाउदेतुशंनश्चतस्रःप्रदिशोभवंतु॥शंनःपर्वताध्रुवयोभवंतुशंनःसिंधवःशमुसं
त्वापः॥शंनोअदितिर्भवतुव्रतेभिःशंनोभवंतुमरुतःस्वर्काः॥शंनोविष्णुःशमुपूषानोअ
स्तुशंनोभवित्रंशमवस्तुवायुः॥शंनोदेवःसवितात्रायमाणःशंनोभवंतूषसोविभातीः॥शंनः
पर्जन्योभवतुप्रजाभ्यःशंनःक्षेत्रस्यपतिरस्तुशंभुः॥२॥शंनोदेवाविश्वदेवाभवंतुशंस
रस्वतीसहधीभिरस्तु॥शमभिषाचःशमुरभिषाचःशंनोदिव्याःपार्थिवाःशंनोअप्याः॥

शंनः सत्यस्यपतयोभवंतुशंनोअर्वंतःशमुसंतुगावः॥शंनऋभवःसुकृतःसुहस्ताःशंनोभ
वंतुपितरोहवेषु॥शंनोअजएकपादेवोअस्तुशंनोहिर्बुध्न्यः शंसमुद्रः॥ शंनोअपांनपा
सेहरस्तुशंनःपृश्निर्भवतुदेवगोपा॥आदित्यारुद्रावसवोजुषंतेदंब्रह्मक्रियमाणंनवीयः॥शृण्व
न्तुनोदिव्याःपार्थिवासोगोजातउतयेयजियासः॥येदेवानांयज्ञियायज्ञियानांमनोर्यज
त्राअमृताऋतज्ञाः॥तेनोरासंतामुरुगायमद्ययूयंपातस्वस्तिभिःसदानः॥२॥इतिजपेत्॥अग्निंप्रतिष्ठाप्येशान्यांगृहान्स्थापयेत्॥ प्रणवस्यपरब्रह्मऋषिः॥परमात्मादेव
ता॥देवीगायत्रीछंदः॥व्याहृतीनांक्रमेणजमदग्निभरद्वाजभृगवऋषयः॥अग्निर्वापुः

सूर्यःप्रजापतयोदेवताःदेवीगायत्रीदेव्युष्णिक्देवीबृहत्यश्छंदांसि॥सूर्योद्वावाहनेविनि॰
॥गृहपीठमध्येवर्तुलेद्वादशांगुलेमंडलेप्राङ्मुखंसूर्यंरक्तपुष्पाक्षतैः॥आकृष्णेनरजसावर्तमानोनिवेशयन्नमृतंमर्त्यंच॥हि
रण्ययेनसविताराथेनादेवोयातिभुवनानिपश्यन्॥ॐभूर्भुवःस्वःकलिंगदेशोद्भवकाश्यपस
गोत्रसूर्येहागच्छेहतिष्ठेतिस्थापयेत्॥आग्नेयेचतुरस्रेचतुर्विंशांगुलेमंडलेप्रत्यङ्मुखंसो
मंश्वेतपुष्पाक्षतैः॥आप्यायस्वगोतमःसोमोगायत्री॥सोमावा॰॥ॐआप्यायस्वस
मेतुतेविश्वतःसोमवृष्ण्यं॥भवावाजस्यसंगथे॥ॐभूर्भुवःस्वःयमुनातीरोद्भवात्रेयसगो

त्रसोमेहाग०॥ दक्षिणेत्रिकोणेत्र्यंगुलेमंडलेदक्षिणाभिमुखंभौमंरक्तपुष्पाक्षतैः॥ अग्निर्मूर्धा
विरूपोगारकोगायत्री॥ अंगारका०ॐअग्निर्मूर्धादिवःककुत्पतिःपृथिव्याअयं॥अपांरेतांसि
जिन्वति॥ॐभूर्भुवःस्वःअवंतीसमुद्भवभारद्वाजसगोत्रभौमेहागच्छ०॥ ईशान्येबाणाकारेच
तुरंगुलेमंडलेउदंमुखंबुधंपीतपुष्पाक्षतैः॥उद्बुध्यध्वंबुधःसोम्योबुधस्त्रिष्टुप्॥बुधावा०॥
ॐउद्बुध्यध्वंसमनसःसखायःसमग्निमिंधंबहवःसनीळाः॥ दधिक्रामग्निमुषसंचदेवी
मिंद्रावतोवसेनिह्वयेवः॥ॐभूर्भुवःस्वःमगधदेशोद्भवात्रेयसगोत्रबुधेहागउ॰॥उत्तरे
दीर्घचतुरस्रेचतुर्विंशांगुलेमंडलेउदंमुखंगुरुंपीतपुष्पाक्षतैः॥ बृहस्पतेयुत्समदोबृह

२०

स्पतिस्त्रिष्टुप्॥ बृहस्पत्यावाहनेवि०॥ॐ बृहस्पतेअतियदर्योअर्हाद्युमद्विभाति॰क्रतुमज्जने
षु॥यद्दीदयच्छवसऋतप्रजाततदस्मासुद्रविणंधेहिचित्रं॥ॐभूर्भुवःस्वःसिंधुदेशोद्भवांगिरस
गोत्रबृहस्पतेहागच्छ०॥ पूर्वेपंचकोणेनवांगुलेमंडलेसोऽमुखंशुक्रंशुक्रपुष्पाक्षतैः॥शुक्रः
पारशरःशुक्रोद्विपदाविराट्॥शुक्रावा०॥ॐशुक्रःशुशुक्वांउषोनजारःपप्रासमीचीदिवोन
ज्योतिः॥ॐभूर्भुवःस्वः॥भोजकटदेशोद्भवभार्गवसगोत्रशुक्रेहागच्छ०॥पश्चिमेधनुषिद्व्यं
गुलेमंडलेप्रत्यंमुखंशनिंहरिपुष्पाक्षतैः॥ शमग्निरग्निभिःकरच्छंनस्तपतुसूर्यः॥शंवातोवात्वरपाअपस्रिधः॥ॐभूर्भुवःस्वःसौरा

इदेशोऽवकाश्यपसगोत्रशनेश्चरोहागच्छ०॥नैर्ऋत्येभूपीकोरद्दादशांगुलेमंडलेदक्षिणाभिमु
खंराङ्कवंधूम्रपुष्पाक्षतेः॥कयानोवामदेवोराङ्गायत्री॥राव्हावा०॥ॐकयानश्चित्रआभुवदूती
सदावृधःसखा॥कयाशचिष्ठयावृता॥ॐभूर्भुवःस्वःराहवेनमःसगोत्रराहोइहा
गच्छ०॥वायव्येध्वजाकोरषडंगुलेमंडलेदक्षिणाभिमुखंकेतुंधूम्रपुष्पाक्षतेः॥केतुंकृण्वं
नकेतवेपेशोमर्याअपेशसे॥समुषद्भिरजा
यथाः॥ॐभूर्भुवःस्वःअंतर्वेदीसमुद्भवेनमोनमःसगोत्रकेतोइहागच्छ०॥ततोयथोक्तकुसुम
तंडुलाभावेयथालब्धोपचारैःस्थापयेत्॥अथाधिदेवताः॥त्र्यंबकोवसिष्ठोरुद्रोनुष्टुप्॥रुद्रो

२९

ॐत्र्यंबकंयजामहेसुगंधिंपुष्टिवर्धनं॥उर्वारुकमिवबंधनान्मृत्योर्मुक्षीयमामृतात्॥त्र्यंबकेहा
गच्छ०॥सूर्यदक्षिणपार्श्वेरुद्र०॥गौरीर्मिमायसलि
लानितक्षत्येकपदीद्विपदीसाचतुष्पदी॥अष्टापदीनवपदीबभूवुषीसहस्राक्षरापरमेव्योम
न्॥उमेहागच्छ०सोमदक्षिणपार्श्वेउमायै०॥यदक्रंदोदीर्घतमास्कंदस्त्रिष्टुप्॥स्कंदा०ॐयदक्रं
दःप्रथमंजायमानउद्यन्त्समुद्रादुतवापुरीषात्॥श्येनस्यपक्षाहरिणस्यबाहूउपस्तुत्यंमहिजा
तंतेअर्वन्॥स्कंदेहागच्छ०भौमदक्षिणपार्श्वेस्कंदा०॥विष्णोर्नुकंदीर्घतमाविष्णुस्त्रिष्टुप्॥विष्णो०
ॐकिंस्विद्यानुकंदीर्याणिप्रवोचंयःपार्थिवानिविममेरजांसि॥योअस्कभायदुत्तरंसधस्थंविचक्रमा

णस्त्रेधोहरायः॥विष्णोइहागच्छ॰बुधदक्षिणपार्श्वेवि॰॥ब्रह्मजज्ञानंगोतमोवामदेवोब्रह्मा
त्रिष्टुप्॥ब्रह्मा॰॥ॐब्रह्मजज्ञानंप्रथमंपुरस्ताद्विसीमतःसुरुचोवेनआवः॥सबुध्न्याउपमाअ
स्यविष्ठाःसतश्चयोनिमसतश्चविवः॥ब्रह्मन्निहागच्छ॰॥गुरुदक्षिणपार्श्वे॥इंद्रोमधुछंदा
इंद्रोगायत्री॥इंद्रा॰॥ॐइंद्रोविश्वतस्परिहवामहेजनेभ्यः॥अस्माकमस्तुकेवलः॥इंद्रेहागच्छ॰
शुक्रदक्षिणपार्श्वेइंद्रा॰॥यमायसोमंयमोयमोनुष्टुप्॥यमा॰॥ॐयमायसोमंसुनुतयमायजु
ह्वताहविः॥यमंहयज्ञोगच्छत्यग्निदूतोअरंकृतः॥यमेहागच्छ॰॥शनिदक्षिणपार्श्वेयमा॰॥मोषुणो
घोरःकण्वःकालोगायत्री॥कालाया॰॥ॐमोषुणःपरापरानिर्ऋतिर्दुर्हणावधीत्॥पदीष्टतृष्मया

केतुदक्षिणपार्श्वे२

सह॥काळेहागच्छ॰राहुदक्षिणपार्श्वेकाळा॰॥उषोवाजंहिवंस्वपश्चित्रोमानुषेजने॥तेनावहसुकृतोअध्वराउपयेलागृणंतिवह्नयः॥चि
त्रगुप्तेइहागच्छ॰चित्रगु॰॥अथप्रत्यधिदेवता॥अग्निंकाण्वोमेधातिथिरग्निर्गायत्री॥अग्ना
ॐअग्निदूतंवृणीमहेहोतारंविश्ववेदसं॥अस्ययज्ञस्यसुक्रतुं॥अग्नेहागच्छ॰सूर्यवामपार्श्वे
अग्न॰अग्निं॰अप्सुमेमेधातिथिरापोनुष्टुप्॥अपा॰॥ॐअप्सुमेसोमोअब्रवीदंतर्विश्वानि
भेषजा॥अग्निंचविश्वशंभुवमापश्चविश्वभेषजीः॥अपइहागच्छइ॰अद्भ्यो॰सोमवामपार्श्वे
अपःआ॰॥स्योनामेधातिथिर्भूमिर्गायत्री॥भूम्या॰॥ॐस्योनापृथिविभवानृक्षरानिवेशनी॥

यछानःशर्मसप्रथाः॥भूमेरहागछ॰भौमवामपार्श्वेभूम्ये॰॥इरंविष्णुर्मेधातिथिर्विष्णुर्गायत्री
॥विष्णवे॰॥ॐइरंविष्णुर्विचक्रमेत्रेधानिदधेपदं॥समूळ्हमस्यपांसुरे॥विष्णोरहागछइर॰बुधवा
मपार्श्वेविष्णवे॰॥इरंश्रेष्ठानिगृत्समदइरंस्त्रिष्टुप्॥इरा॰॥ॐइरश्रेष्ठानिद्रविणानिधेहिचित्तिं
दक्षस्यसुभगत्वमस्मे॥पोषंरयीणामरिष्टिंतनूनांस्वाम्नंवाचःसुदिनत्वमह्नां॥इरेहागछ॰
गुरुवामपार्श्वे॰इरा॰॥इरंराणीवृषाकपिरिंराणीपृश्निः॥इरा॰ॐइराणीमासुनारिषुसुभगाम
हमश्रवं॥नह्यस्याअपरंचनजरसामरतेपतिर्विश्वस्मादिंद्रउत्तरः॥शुक्रवामपार्श्वेइंराणी॰॥प्र
जापतेहिरण्यगर्भःप्रजापतिस्त्रिष्टुप्॥प्रजाप॰ॐप्रजापतेनत्वेतान्यन्योविश्वाजातानिपरि

२३

ताबभूव॥यत्कामास्तेजुहुमस्तन्नोअस्तुवयंस्यामपतयोरयीणां॥प्रजापतेहागछ॰॥शु
निवामपार्श्वेप्रजापति॰॥आयंगौःसार्पराज्ञीसर्पागायत्री॥सर्प॰ॐआयंगौःपृश्निर
क्रमीदसदन्मातरंपुरः॥पितरंचप्रयन्त्स्वः॥सर्पेहागछ॰राहुवामपार्श्वे॰सर्पेन्॰॥ब्र
ह्मजज्ञानंगोतमोवामदेवोब्रह्मात्रिष्टुप्॥ब्रह्मावा॰ॐब्रह्मजज्ञानंप्रथमंपुरस्तात्वहिसी
मतःसुरुचोवेनआवः॥सबुध्न्याउपमाअस्यविष्ठाःसतश्चयोनिमसतश्चविवः॥ब्रह्मन्इ
हा॰केतुवामपार्श्वे॰ब्रह्माणं॰॥गणानांत्वागृत्समदोगणपतिर्जगती॥गणपत्या॰ॐगणा
नांत्वागणपतिंहवामहेकविंकवीनामुपमश्रवस्तमं॥ज्येष्ठराजंब्रह्मणांब्रह्मणस्पत

आनश्रृण्वन्नूतिभिःसीदसादनं॥गणपतेहा०॥रा ऊरुत्तरतो विनायकं०॥जानवेदसेकश्यपो
दुर्गात्रिष्टुप्॥ॐ जातवेदसेसुनवामसोममरातीयतोनिदहातिवेदः॥सनःपर्षदतिदुर्गाणिवि
श्वानावेवसिंधुंदुरितात्यग्निः॥दुर्गेहागच्छ०॥नेरुत्तरतोदुर्गा०॥तववायोव्यश्वांगिरसोवा
युर्गायत्री॥ॐ तववायवृतस्पतेत्वष्टर्जामातरद्भुत॥अवांस्यावृणीमहे॥वायोऽहागच्छ०॥
स्वेरुत्तरतोवायुं०॥आदित्यहृत्सआकाशोगायत्री॥ॐआदित्यंगर्भंपयसोव्यन्तिमेधया
वासरं॥यशोयदिध्यतेदिवा॥आकाशेहागच्छ०॥रहोदक्षिणतःआका०॥एषोउषाःप्रकृ
तेवाश्विनोगायत्री॥ॐ एषोउषाअपूर्व्यास्युच्छतिप्रियादिवः॥स्तुषेवामश्विनाबृहत्॥अश्वि

नाविहागच्छतंऽहतिश्चतंकृतोदक्षिणतःअश्विनो०॥यद्वाविनायकादीनपंचोत्तरतएव०॥वा
स्तोष्पतेवसिष्ठोवास्तोष्पतिस्त्रिष्टुप्॥ॐ वास्तोष्पतेप्र०॥उत्तरेवास्तोष्पतिं०॥क्षेत्रस्यवामदेव
क्षेत्राधिपतिरनुष्टुप्॥ॐ क्षेत्रस्यपति०॥तत्रैवक्षेत्रपालं०॥इंद्रादिक्षुपूर्वादिदिक्षुइंद्रयमौ
लोकपालान्॥इंद्रंविश्वाअवीवृधंसमुद्रव्यचसंगिरः॥रथीतमंरथीनांवाजानांसत्पतिंपतिं॥अग्निंकाण्वोमधातिथिरग्निर्गायत्री॥ॐअग्निमू
तंहवीमहेहोतारंविश्ववेदसं॥अस्ययज्ञस्यसुक्रतुं॥यमायसोमंयमोयमोनुष्टुप्॥ॐयमा
यसोमंसुनुतयमायजुहुताहविः॥यमंहयज्ञोगच्छत्यग्निदूतोअरंकृतः॥सोषुघोरःकविना

निर्ऋतिर्गायत्री॥ओंमोषुणःपरापरानिर्ऋतिर्दुर्हणावधीत्॥पदीष्टतृष्टयासह॥त्वंनोअग्नेव
रुणस्त्रिष्टुप्॥ॐत्वंनोअग्नेवरुणस्यविद्वान्देवस्यहेळोवयासिसीष्ठाः॥यजिष्ठोवह्नि
तमःशोशुचानोविश्वाद्वेषांसिप्रमुमुग्ध्यस्मत्॥तववायोऋभ्वांगिरसोवायुर्गायत्री॥ॐतववा
यवृतस्पतेत्वष्टर्जीमातरद्भुत॥अवांस्यावृणीमहे॥सोमोधेनुंसोमोअर्वंतमाशुंसोमोवीरंकर्मण्यदक्षति॥सादन्यंविदथ्यंसभेयंपितश्रवणंयोददाशदस्मै॥त
मीशानंजगतस्तस्थुषस्पतिंधियंजिन्वमवसेहूमहेवयं॥पूषानोयथावेदसामसद्धेरक्षितापायुरदब्धःस्वस्तये॥तदस्तुमित्रावरुणातदग्नेशं

योरस्मभ्यमिदमस्तुशस्तं॥अस्मेमहिगाधमुतप्रतिष्ठांनमोदिवेबृहतेसादनाय॥गृहानैप्रति
ष्ठासूक्तंतस्यनिष्ठितमयावाचांस्तव्यं तस्माद्यद्यपिदूरंवपश्वंलभतेगृहानैवैनानाजिगमि
षतिगृहाहिपश्वनांप्रतिष्ठाप्रतिष्ठा॥तनोध्यानानि॥पद्मासनःपद्मकरःपद्मगर्भसमद्युतिः॥स
प्ताश्वरथसंयुक्तोद्विभुजस्यात्सदारविः॥श्वेतःश्वेतांबरधरोदशाश्वश्वेतभूषणः॥वरदाणिहिबा
हुभ्यांकर्तव्योवरदःशशी॥२॥रक्तमाल्यांबरधरःशक्तिरत्नगदाधरः॥चतुर्भुजोमेषगवोवरद
स्याधरासुतः॥३॥पीतमाल्यांबरधरःकर्णिकारसमद्युतिः॥खड्गचर्मधराणिःसिंहस्थोव
रदोबुधः॥४॥देवैरेत्यगुरूतद्वत्पीतश्वेतोचतुर्भुजौ॥दंडिन्योवरदोकार्योसाक्षसूत्रकमंडलू॥५॥

इंद्रनीलद्युतिःश्रीवरदोगृध्रवाहनः॥बाणबाणासनधरःकर्तव्योर्कसुतःसदा॥६॥करालव
दनःखड्गचर्मश्रीवरप्रदः॥नीलसिंहासनस्थश्चराक्षत्रप्रशस्यते॥७॥धूम्राद्विबाहवःसर्वे
दिनोर्ककृताननः॥गृध्रासनगतानित्यंकेतुवस्यवरप्रदः॥८॥सर्वेकिरीटिनःकार्यागृहलोक
हितावहाः॥अंगुलेनोछ्रिताःसर्वेशुभमष्टोत्तरंसदा॥९॥ततःषोडशोपचारैःसंपूज्येशान्यां
कुंभेवरुणंसंपूज्यकलशप्रार्थना॥देवदानवसंवादेमथ्यमानेमहोदधौ॥उत्पन्नोसितदाकुंभ
विधृतोविष्णुनास्वयं॥त्वत्तोयेसर्वतीर्थानिदेवाःसर्वेत्वयिस्थिताः॥त्वयितिष्ठंतिभूतानित्वयि
प्राणाप्रतिष्ठिताः॥शिवस्त्वयेत्वमेवासिविष्णुस्त्वंचप्रजापतिः॥आदित्यावसवोरुद्राविश्वेदेवाः

सपैतृकाः॥त्वयितिष्ठंतिसर्वंपियतःकामफलप्रदाः॥तत्प्रसादादिमंयज्ञंकर्तुमीहजलोद्भव॥संनि
ध्यंकुरुदेवेशप्रसन्नोभवसर्वदा॥इति॥ततोन्वाधानं॥अस्मिन्नन्वाहितेग्नावित्यादिचक्षुष्यंतेनव
ग्रहान्प्रत्येकममुकसंख्याकाभिःसमिद्भर्वाज्याहुतिभिः॥अधिदेवतादीन्प्रत्यधिदेवतादीनेकै
केकयाहुत्याविनायकांदिपंचदेवतान्रास्तोषतिक्षेत्रपालंरंद्राद्यष्टौलोकपालान्प्रत्येककयाहुत्या
भुवनेश्वरींप्रत्येकंदूर्वातिलमिश्रगोधूमपायसाज्यानांअष्टशताष्टाविंशत्यन्यतराभिरिंद्राणी
मिंद्रंचप्रत्येकमुक्तद्रव्यैरष्टाविंशत्यष्टान्यतराहुतिभिर्यस्ये॥शेषेणास्विष्टकृतमित्यादिउक्तदेवे
भ्योमुष्मैत्वाजुष्टंनिर्वपामीतिचतुरश्चतुरोमुष्टीन्निरूप्यनथैवप्रोक्षणीरुक्त्वाज्यभागौ

तेयजमानेनत्यागेकृतेऽक्तसंख्ययायथाक्रमेणऋत्विग्भिर्होमः कार्यः॥तत्रतिसृभिर्ईर्वाभिः दधि
मधुज्याक्ताभिरेकाकृतिः एवंसमिधोभ्यक्ताः॥ततःखिष्टकृतादिप्रायश्चित्तहोमांतेदिक्पालेभ्यो
नवग्रहेभ्योभुवनेश्वरीइंद्राणीइंभ्यश्चक्षेत्रपालायसरीषपमाषभक्तबलींदत्वा॥समुद्रादूर्मिरितिसू
क्तस्यवामदेवऋषिःअग्निर्देवतात्रिष्टुप्छंदः॥चूर्णाकृतिहोमेविनि०॥ॐसमुद्रादूर्मिमधुमाउ
दारडुपांशुनासममृतत्वमानट्॥घृतस्यनामगुह्यंयदस्तिजिह्वादेवानाममृतस्यनाभिः॥वयंनाम
प्रब्रवामाघृतस्यास्मिन्यज्ञेधारयामानमोभिः॥उपब्रह्माशृणवच्छस्यमानंचतुःशृंगोवमीद्गौए
तत्॥चत्वारिशृंगात्रयोअस्यपादाद्वेशीर्षेसप्तहस्तासोअस्य॥त्रिधाबद्धोवृषभोरोरवीतिमहो

स्वोमर्त्याँआविवेश॥त्रिधाहितंपणिभिर्गुह्यमानंगविदेवासोघृतमन्वविंदन्॥इंद्रएकं
सूर्यएकंजजानवेनादेकंस्वधयानिष्टतक्षुः॥एताअर्षंतिहृद्यात्समुद्रात्छतव्रतायिपुणाना
वचक्षे॥घृतस्यधाराअभिचाकशीमिहिरण्ययोवेतसोमध्यआसां॥सम्यक्स्रवंतिस
रितोनधेनाअंतर्हृदामनसापूयमानाः॥एतेअर्षंत्यूर्मयोघृतस्यमृगाइवक्षिपणोरीषमाणा
॥सिंधोरिवप्राध्वनेशूघनासोवातप्रमियःपतयंतियह्वाः॥घृतस्यधाराअरुषोनवाजीकाष्ठा
भिंदन्नूर्मिभिःपिन्वमानाः॥अभिप्रवंतसमनेवयोषाःकल्याण्यःस्मयमानासोअग्निं॥घृ
तस्यधाराःसमिधोनसंततास्रुषाणोहव्यानिजातवेदाः॥कन्याइववहतुमेतवाउअंजंजाना

अभिचाकशीमि॥यत्रसोमःसूयतेयत्रयज्ञोघृतस्यधाराअभितस्पृंते॥अभ्यर्षतसुष्टु
तिंगव्यमाजिमस्मासुभद्राद्रविणानिधत्त॥इमंयज्ञंनयतदेवतानोघृतस्यधारामधुमत्प
वंते॥धामंतेविश्वंभुवनमधिश्रितमंतःसमुद्रेहृदयंदेवयोनौ॥अपामनीकेसमिथेयआ
भृतस्तमश्याममधुमंतंतऊर्मिं॥इतिपूर्णाहुतिंहुत्वाप्रणीताविमोकादिशेषसमाप्तौ
यजमानमभिषिंचेत्॥आपोहिष्ठेतिनवभिः॥यएकइद्विदयतइतितृचस्यगोतमऋ
ष्यनुष्टुप्॥अभिषेकेविनियोगः॥ॐयएकइद्विदयतेवसुमतोयएशुषे॥ईशानोअप्र
तिष्कुतश्चोअंग॥कण्वमंतमराधसंपराशुंपमिवस्फुरत्॥कदानःशुश्रावद्गिरइंद्रोअंग॥

यश्चिद्धिसत्यसोमपाभुतावाँआविवासति॥उग्रंतत्पत्यतेशवइंद्रोअंग॥त्रिभिर्हदेवैरितिसप्त
नांवसिष्ठस्त्रयाणामग्निस्तवोविश्वेदेवाःआद्यागायत्री॥ततोनुष्टुप्॥तिस्रोगायत्र्योंत्ये
नुष्टुभौ॥अभिषेके॥ॐत्रिभिर्हदेवैरितिवसिष्ठैःसोमधामभिः॥अग्नेरक्षैःपुनीहिनः॥
पुनंतुमादेवजनाःपुनंतुवसवोधिया॥विश्वेदेवाःपुनीतमाजानवेदःपुनीहिमा॥प्रप्या
यस्वप्रस्यंदस्वसोमविश्वेभिरंशुभिः॥देवेभ्योदेवमंहयिः॥उपप्रियंपनिप्नतंयुवानमाहुती
धं॥अगन्महित्वनोनमः॥अक्रान्त्समुद्रःप्रथमेविधर्मणाजनयन्प्रजाभुवनस्यराजति॥
वृषाहरीरथेयुजाससस्रेआतिष्ठद्वज्रीविश्वसोमसः॥यःपावमानीरध्येत्यृषिभिःसंभृतंरसं॥
सर्वंसपूतमश्नातिस्वदितंमातरिश्वना॥

पावमानीर्योअध्येत्यृषिभिःसंभृतंरसं॥तस्मैसरस्वतीदुहेक्षीरंसर्पिर्मधूदकं॥उभयंभृ
णवच्चनेतिभर्गइंद्रोहृहती॥अभिषे०॥ॐउभयंभृणवच्चनइंद्रोअर्वागिदंवचः॥स त्रा
च्यामघवासोमपीतयेधियाशविष्ठआगमत्॥स्वस्तिदाविशोभारद्वाजःशासइंद्रोहृहती
अभिषे०॥ॐस्वस्तिदाविशस्पतिर्हवेमहेहविष्मंतोवयं॥हंसेंद्रःपुरएतुनःसोमपाअभयं
करः॥त्र्यंबकंवसिष्ठोरुद्रोनुष्टुप्॥अभि०॥ॐत्र्यंबकंयजामहेसुगंधिंपुष्टिवर्धनं॥उर्वा
रुकमिवबंधनान्मृत्योर्मुक्षीयमामृतात्॥जातवेदसेकश्यपोदुर्गात्रिष्टुप्॥अभि०॥ॐ
जातवेदसेसुनवामसोममरातीयतोनिदहातिवेदःसनःपर्षदतिदुर्गाणिविश्वानावेवसिंधुं

दुरितात्यग्निः॥समुद्रज्येष्ठाश्चतुर्णांवसिष्ठआपस्त्रिष्टुप्॥अभि०॥ॐसमुद्रज्येष्ठाः
सलिलस्यमध्यात्पुनानायंत्यनिविशमानाः॥इंद्रोयावज्रीहषभोरराद तापोदे
वीरिहमामवंतु॥याआपोदिव्याउतवास्रवंतिखनित्रिमाउतवायास्वयंजाः॥समुद्रा
र्थायाःशुचयःपावकास्ताआपो०॥यासोराजावरुणोयातिमध्येसत्यानृतेअवप
श्यंजनानां॥मधुश्चुतःशुचयोयाःपावकास्ताआपो०॥यासुराजावरुणोयासुसो
मोविश्वेदेवायासूर्जंमदंति॥वैश्वानरोयास्वग्निःप्रविष्टस्ताआपो०॥त्रायंतामिहदे
वास्त्रायतांमरुतांगणः॥त्रायंतांविश्वाभूतानियथायमरपाअसत्॥आपइद्वाउभे
२त्रायंतामितितिस्रोणोसप्तऋषयआपोनुष्टुप्॥अभि०२

षजीरापोअभीवत्वातनूः॥आपःसर्वस्यभेषजीस्तास्तेकृण्वंतुभेषजं॥हस्ताभ्यांदशशा
खाभ्यांजिह्वावाचःपुरोगवी॥अनामयित्नुभ्यांत्वाताभ्यांत्वोपस्पृशामसि॥इमाआपः
तिसृणांसप्तऋषयऋषयोनुष्टुप्॥अभि०॥ॐइमाआपःशिवतमाइमाःसर्वस्यभेषजीः
इमाराष्ट्रस्यवर्धनीरिमाराष्ट्रभृतोमृताः॥याभिरिंद्रमभ्यषिंचत्प्रजापतिःसोमंराजानंवरुणं
यमंमनुं॥ताभिरद्भिरभिषिंचामित्वामहंराज्ञात्वमधिराजोभवेह॥महांतंत्वामहीनांस
म्राजंचर्षणीनांदेवीजनित्र्यजीजनद्भद्राजनित्र्यजीजनत्॥देवस्यत्वेत्यापस्तंबऋषिर्वीये
स्त्रिभिः॥तमीशानंजगतस्तस्थुषस्पतिंधि

यंजिन्वमवसेहूमहेवयं॥पूषानोयथावेदसामसद्वृधेरक्षितापायुरद्भ्यस्स्तये॥तम
न्तेरुद्रोअसुरोमहोदिवस्त्वं ग्रावेमाहनंपृक्षईमहे॥तंवोतेरुणेर्यासिशंगयस्तंपूष
विधतःपासिनुत्मना॥तमुष्टहीत्यांगिरसस्त्रिरश्चीरुद्रस्त्रिष्टुप्॥अभि०॥ॐतमुष्टहियः
स्त्रिषुःसुधन्वायोविभ्वस्यक्षयतिभेषजस्य॥यक्ष्वामहेसौमनसायरुद्रंनमोभिर्देवमसु
रंदुवस्य॥भुवनस्यपितरंगृणिष्वारुद्रंत्रिष्टुप्॥अभि०॥ॐभुवनस्यपितरंगीर्भिराभी
रुद्रंदिवावर्धयारुद्रमक्तौ॥बृहंतमृष्वमजरंसुषुम्नमृधग्घ्येवमकविनेषितासः॥यातेरु
द्रःकर्त्यपोरुद्रस्त्रिष्टुप्॥अभि०॥ॐयातेरुद्रशिवातनूरघो०॥यज्जाग्रतइतिषण्णांप्रजापति

मेनस्त्रिष्टुप्॥अभि॰॥ॐ यज्जाग्रतोदूरमुदैतुदैवंतदुसुप्तस्यतथैवैति॥दूरंगमंज्योतिषांज्यो
तिरेकंतन्मेमनःशिवसंकल्पमस्तु॥येनकर्माण्यपसोमनीषिणोयज्ञेकृण्वंतिविदथेषुधीराः॥
यदपूर्वंयक्षमंतःप्रजानांतन्मे॰॥यस्मज्ञानमुतचेतोधृतिश्चयज्योतिरंतरमृतंप्रजासु॥य
स्मान्नऋतेकिंचनकर्मक्रियतेतन्मेम॰॥येनेदंभूतंभुवनंभविष्यत्परिगृहीतममृतेनसर्वं॥
येनयज्ञस्तायतेसप्तहोतातन्मेमनः॥यस्मिन्नृचःसामयजूंषियस्मिन्प्रतिष्ठितारथनाभा
विभाराः॥यस्मिंश्चित्तंसर्वमोतंप्रजानांतन्मेम॰॥सुषारथिरश्वानिवयंमनुष्यान्नेनी
यतेभीशुभिर्वाजिनइव॥हृत्प्रतिष्ठंयदजिरंयविष्ठंतन्मे॰॥इंद्रत्वाहषमंपचानोविश्वामि ३१

त्रइंद्रोगायत्री॥अभि॰॥ॐ इंद्रत्वाहषभंवयंसुनेसोमेहवामहे॥सपाहिमध्वोअंधसः॥इंद्रऋतु
विदंसुतंसोमंहर्यपुरुष्टुत॥पिबावृषस्वतातृपिं॥इंद्रप्रणोधितावानंयज्ञेविश्वेभिर्देवेभिः॥नि
रस्तवानधिरणेते॥इंद्रसोमाःसुताइमेतवप्रयंतिसत्पते॥क्षयंचंद्रासइंदवः॥राधिषाजठरेसुतं
सोममिंद्रवरेण्यं॥तवद्युक्षासइंदवः॥सुतास्त्वामभिषिंचंतुब्रह्मविष्णुमहेश्वराः॥वासुदेवोजगन्ना
थस्तथासंकर्षणोविभुः॥प्रद्युम्नश्चानिरुद्धश्चभवंतुविजयायते॥भास्वंउल्लोम्निभगवान्यमो
वैनिर्ऋतिस्तथा॥वरुणःपवनश्चैवधनाध्यक्षस्तथाशिवः॥ब्रह्मणासहिताःसर्वेदिक्पालाःपां
तुतेसदा॥कीर्तिर्लक्ष्मिर्धृतिर्मेधापुष्टिश्रद्धाक्रियामतिः॥बुद्धिर्लज्जावपुःशांतिःकांतिस्तुष्टिश्च

मातरः॥एतास्त्वामभिषिंचंतुदेवपत्न्यःसमागताः॥आदित्यश्चंद्रमाभौमोबुधजीवसुतार्कजाः॥ग्र
हास्त्वामभिषिंचंतुराजंकेतुश्चर्षिताः॥देवदानवगंधर्वायक्षराक्षसपन्नगाः॥ऋषयोमुनयोगा
वोदेवमातरएवच॥देवपत्न्योधुवानागोदैत्याश्चाप्सरसांगणाः॥अस्त्राणिसर्वशस्त्राणिराजा
नोवाहनानिच॥ओंषधानिरत्नानिकालस्यावयवाश्चये॥सरितःसागराःशैलास्तीर्थानिजल
दानदाः॥एतेत्वामभिषिंचंतुसर्वकामार्थसिद्धये॥अभिषिक्तोग्निंसंपूज्याचार्यायधेनुंदक्षि
णेनदद्याद्दंसदक्षिणमन्येभ्यश्चदक्षिणांदत्वादेवतानामुत्तरपूजांकृत्वाविसृज्याचार्यहस्तेद
त्वाग्निंसंपूज्यगच्छगच्छेतिविसृज्य॥महाशांतिंपठित्वाविप्रान्संभोज्यभुंजीत॥ ॥इतिकमल

करभट्टकृताजोदर्शनशांतिः॥अथगृह्याग्नेःपुनःसंधाने॥कर्तोग्निविच्छेदकालंगणि
त्वायदिप्रत्यब्दंकृच्छ्रंकृत्वाप्रातर्होमदर्शपूर्णमासस्थालीपाकविच्छेदनिमित्तंब्रीह्या
दिद्रव्यंदत्वादेशकालौस्मृत्वाविच्छिन्नस्यगृह्याग्नेःपुनःसंधानंकरिष्ये॥इत्युक्त्वाअ
ग्निंप्रतिष्ठाप्याघारावाज्येनेत्येनेत्यग्निंपवमानमग्निंप्रजापतिंचाज्येनाग्निंवरुणा
ग्निंपूषाग्निंप्रजापतिंचलाजद्रव्येणसूर्यासावित्रींचतुर्धरमाज्येनशेषेणस्विष्टकृतमि
त्याद्याघारांते॥अग्नआयूंषीतिसृणामंत्राणांवैश्वामित्रसाऋषयःअग्निःपवमानोदेवता
गायत्रीछंदः॥पुनःसंधानाज्यहोमेविनि०॥ॐअग्नआयूंषिपवसआसुवोर्जमिषंचनः

ओबाधस्वदुष्टुतींस्वा॰॥अग्नयेपवमानायेदं॰॥ॐअग्निर्ऋषिःपवमानःपांचजन्यःपुरो
हितः॥तमीमहेमहागयंस्वा॰॥अग्नयेप॰॥ॐअग्नेपवस्वस्वपाअस्मेवर्चःसुवीर्यं॥दधद्रयिं
मयिपोषंस्वाः॥अग्न॰॥तमर्यमावसुश्रुतोग्निस्त्रिष्टुप्॥पुनः॰आज्य॰॥ओतमर्यमाभव
सियत्कनीनांनामस्वधावन्गृण्त्यंपिपर्षि॥अंजंतिमित्रंसुधितंनगोभिर्यदंपतीसमनसा
कृणोषिस्वा॰अग्नयइदं॰॥प्रजापतेहिरण्यगर्भःप्रजापतिस्त्रिष्टुप्॥आज्यहोमेण
ॐप्रजापतेनत्वदेतान्यन्योविश्वाजातानिपरिताबभूव॥यत्कामास्तेजुहुमस्तन्नोअ
स्तुवयंस्यामपतयोरयीणांस्वाहा॰प्रजा॰॥पत्न्यांजलावुपस्तीर्यहिलीजानावपतित्रिर्जी

३३

मरण्यानां॥हविरवत्तेचाभिघार्य॥अर्यमणंवरुणंपूषणमित्रयाणांयामदेवायेमाग्नि
र्वरुणाग्निःपूषाग्निरनुष्टुप्॥पुनः॰लाजहो॰॥ॐअर्यमणंनुदेवंकन्याअग्निमयक्षत॥स
इमांदेवोअर्यमाप्रेतोमुंचातुनामुतःस्वाहा॥अर्यम्णेग्नय॰॥वरुणंनुदेवंकन्याअ॰॥सइमां॰
देवोवरुणःप्रे॰वरु॰॥पूषणंनुदेवंक॰सइमांदेवःपूषाप्रे॰पूषाग्नय॰॥त्रिर्लाजानुत्वा॥प्रजा
पतयेस्वाहा॰॥प्रजाप॰भूर्पुटेनकृत्वा॥आनःप्रजामितिचतुर्णांसूर्यासावित्रीसूर्यासा
वित्री॥आद्यजगती॥द्वितीयात्रिष्टुप्॥अंत्येनुष्टुभौ॥पुनःआज्य॰ॐआनःप्रजांजनयतुप्र
जापतिराजरसायसमनक्त्वर्यमा॥अदुर्मंगलीःपतिलोकमाविशशंनोभ वद्विपदेशंचतु

ष्पदेस्वा०॥ सूर्या०॥ ॐअघोरचक्षुरपतिघ्येधिशिवापशुभ्यःसुमनाःसुवर्चाः॥वीरसूर्दे
वकामास्योनाशंनोभवद्विपदेशंचनुष्पदेस्वा०॥ॐइमांत्वमिंद्रमीढ्वःसुपुत्रांसुभगांकृ
णु॥दशास्यांपुत्रानाधेहिपतिमेकादशंकृधि॥स्वा०॥ॐसम्राज्ञीश्वशुरेभवसम्राज्ञीश्व
श्र्वांभव॥ननांदरिसम्राज्ञीभवसम्राज्ञीअधिदेवृषुस्वा०॥समंजंतुसूर्यासावित्रीसूर्या
सावित्रीअनुष्टुप्॥ॐसमंजंतुविश्वेदेवाःसमापोहृदयानिनौ॥समातरिश्वासंधातास
मुदेष्ट्रीदधातुनौ॥इतिदधिप्राश्यपत्न्येदत्वाआज्यशेषेणवाहृदयमनु॑त्वाविष्टकृता
दिहोमशेषंसमापयेत्॥ ॥इतिपुनःसंधानं॥ ॥अथगर्भाधानं॥ ॥कर्तादेशकालौ

संकीर्त्यास्यांभार्यायांजनिष्यमाणसर्वगर्भाणांबीजगर्भजनोनाशद्वारापतिगर्भसंस्का
रतिरात्रार्थंश्रीपरमेश्वरप्रीत्यर्थंगर्भाधानंकरिष्ये॥तदंगतयागणेशपूजापुण्याहवाचन
मातृकापूजनांदीश्राद्धानिकृत्वागृह्याग्निंमारुतसंज्ञंप्रज्वाल्यास्मिन्नन्वाहितेग्नावि
त्यादिचक्षुष्यंतेप्रजापतिंचरुणाविष्णुंषड्वारमाज्येनप्रजापतिंचाज्येनशेषेणास्विष्टकृ
तमित्यादिप्रजापतयेमंत्रवच्चरुंश्रपयित्वाचक्षुष्यंतेचरुमवदाय॥ॐप्रजापतयेस्वाहेति
हुत्वा॥विष्णुर्योनिमितितिसृणांत्वष्टाविष्णुरनुष्टुप्॥गर्भो०आज्यहोमे०ॐविष्णुर्योनिं
कल्पयतुत्वष्टारूपाणिपिंशतु॥आसिंचतुप्रजापतिर्धातागर्भंदधातुतेस्वा०॥विष्णवरु०

इतिसर्वत्रत्यागः॥ॐ गर्भधेहिसिनीवालिगर्भधेहिसरस्वति॥गर्भन्तेअश्विनोदेवावा
धत्तांपुष्करस्रजास्वाहा॥वि०॥ॐहिरण्ययीअरणीयंनिर्मथतोअश्विना॥तंतेगर्भंह
वामहेदशमेमासिसूतवेस्वाहा॥वि०॥ॐनेजमेषेतिसृणांत्वष्टाविष्णुरनुष्टुप्॥गर्भधा०
ॐनेजमेषपरापतसुपुत्रःपुनरापत॥अस्येमेपुत्रकामायेगर्भमाधेहियःपुमान्स्वा०
वि०ओंयथेयंपृथिवीमह्युत्तानागर्भमादधे॥एवंतंगर्भमाधेहिदशमेमासिसूतवेस्वा०
वि०॥ॐविष्णोश्रेष्ठेनरूपेणास्यानार्योगवीन्यां॥पुमांसंपुत्रानाधेहिदशमेमासि
सूतवेस्वाहा॥वि०॥ॐप्रजापतेनत्वदेतान्यन्योविश्वंरुत्वा॥अपनःशोशुचदघमित्यष्टानां

कुत्सोग्निर्गायत्री॥पत्न्यामूर्धानमरणिवि०॥अपनःशोशुचदघमग्नेशुशुग्ध्यारयिं॥
अपनःशोशुचदघं॥सुक्षेत्रियासुगातुयावसूयाचयजामहे॥अप०॥प्रयङ्गन्दिष्टएषां
प्रास्माकासश्चसूरयः॥अप०॥प्रयन्तेअग्नेसूरयेजायेमहिमतेवयं॥अप०॥प्रयतदग्नेः
सहस्वतोविश्वतोयंतिभानवः॥अप०॥तंहिविश्वतोमुखविश्वतःपरिभूरसि॥अप०॥द्वि
षोनोविश्वतोमुखातिनावेवपारय॥अप०॥सनःसिंधुमिवनावयातिपर्षास्वस्तये॥अप०
याःफलिनीरित्यस्याथर्वणोभिषगोषधयोनुष्टुप्॥जपेवि०॥ॐयाःफलिनीर्याअफला
अपुष्पायाश्चपुष्पिणीः॥बृहस्पतिप्रसूतास्तानोमुंचंत्वंहसः॥वधेनदस्युमितिषण्णांवसुश्रु
तोग्निस्त्रिष्टुप्॥अग्न्युपस्थानेवि०॥ॐवधेनदस्युमहिचातयस्ववयःकृण्वानस्तन्वेरिषायै॥

पिपर्षिक्षसहसस्पुत्रदेवान्त्सोअग्नेपाहिनृतमवाजेअस्मान्॥वयंतेअग्नउक्थैर्विधेमव
यंहव्यैःपावकभद्रशोचे॥अस्मेरयिंविश्ववारंसमिन्वास्मेविश्वानिद्रविणानिधेहि॥अस्मा
कमग्निमध्वरंजुषस्वसहसःसूनोऋषधस्थहव्यं॥वयंदेवेषुसुकृतस्यामशर्मणात्रिवरू
थेनपाहि॥विश्वानिनोदुर्गहाजातवेदःसिंधुंननावादुरितातिपर्षि॥अग्नेअत्रिवन्नमसा
गृणानोऽस्माकंबोध्यविताततनूनां॥मस्त्वाहराकीरिणामन्यमानोमर्त्यमर्त्योजोहवीमि॥
जातवेदोयशोअस्मासुधेहिप्रजाभिरग्नेअमृतत्वमश्याम॥यस्मैत्वंसुकृतेजातवेदउलोकमग्ने
कृणवःस्योनं॥अश्विनंसपुत्रिणंवीरवंतंगोमंतंरयिंनशतेस्वस्ति॥अग्निस्तुविश्रवमिति ३६

सू०

हयोर्वसुश्रुतोग्निस्त्रिष्टुप्॥अग्न्यु०॥ॐअग्निस्तुविश्रवंमनुविप्रंस्नाणमुत्तमं॥अनूनं
श्रावयत्पतिंपुत्रंरराविषाभुषं॥अग्निर्ददातिसत्पतिंसासाहयोयुधानृभिः॥अग्निरत्यंरघुष्य
दंजेतारमपराजितं॥इत्याग्निमुपस्थाय॥सूर्योनोदिवस्पातितिपंचानांचक्षुःसूर्योगायत्री
॥सूर्योपस्थानेविनियोगः॥ॐसूर्योनोदिवस्पातुवातोअंतरिक्षात्॥अग्निर्नःपार्थिवेभ्यः
॥ओषासवितर्यस्यरातिंसवाँअर्हसि॥पाहिनोदिद्युतःपतंत्याः॥चक्षुर्नोदेवःसविताचक्षु
र्नउतपर्वतः॥चक्षुर्धाताददातुनः॥चक्षुर्नोधेहिचक्षुषेचक्षुर्विख्यैतनूभ्यः॥संचेदंविचप
श्येम॥प्रसंदृशंप्रवयंप्रतिपश्येमसूर्य॥विपश्येमनृचक्षसः॥इतिसूर्यमुपस्थाय॥तदा

रात्रौवाश्वगंधा॥उरीर्षेतिहेयोःसूर्यासावित्र्यनुष्टुप्॥अश्वगंधारससेचनेविनियोगः॥ॐउरीर्षो
तःपनिवतीत्येषाविश्वावसुनमसागीर्भिरिति॥अन्यामिछपितृषदंव्यक्तांसतेभागोजनुषान
स्यविद्धि॥उदीर्षातोविश्वावसोनमसेडामहेत्वा॥अन्यामिछप्रफर्व्यं१संजायांपत्यासृज॥इ
तिस्त्रोहोतेनभार्यायाःदक्षिणनासायांरसमासिंच्यरसेउदरंगतेतामाचम्य॥गंधर्वस्यविश्वा
वसोर्मुखमसि॥विश्वावसुसोमगंधर्वमापोदद्भुषीस्तदेतेनाप्यायन॥तदन्वैरिंद्रोरारह
णआसांपरिसूर्यस्यपथिभिःपरुष्यत॥विष्णुर्योनिमितितिस्रभिः॥नेजमेषेतिचतुर्भिश्चयो
निमभिमृश्य॥तांपूषंस्तूर्यासावित्रीसूर्यासावित्रीत्रिष्टुप्॥ज०ॐतांपूषंछिवतमामेरय

३८

स्यस्यांबीजंमनुष्याःवपंति॥यानईरुज्रयंतीविश्रयातेयस्यमुंतःप्रहरामशेषु॥योग
र्भमोषधीनांवासिष्ठःपर्जन्योगायत्री॥ज०॥ॐयोगर्भमोषधीनांगवांकृणोत्यर्वतां॥पर्ज
न्यःपुरुषीणां॥अहंगर्भःप्रजावान्राजापत्योगर्भंइंइस्त्रिष्टुप्॥ॐअहंगर्भमदधामोष
धीषहंविश्वेषुभुवनेषंतः॥अहंप्रजाअजनयंपृथिव्याअहंजनिभ्योअपरीषुपुत्रान्॥इ
तिस्त्रियंगत्वा॥प्राणोरेतोदधाम्यसो॥यथाभूमिरग्निगर्भोयथाद्यौरिंद्रेणगर्भिणी॥वा
युर्यथादिशांगर्भएवंतेगर्भंदधाम्यसाविति स्वनामोक्त्वास्विष्टकृतादिशेषंसमाप्य॥इतं
दशावाविप्रान्भोजयेत्॥इतिगर्भाधानं॥ ॥अथपुंसवनमनवलोभनसीमंता: उ

नक्षत्राणि चैतानि तिष्योहस्तः पुनर्वसु॥ अभिजिच्छ्रोणपदोश्चैव अनुराधाश्विनी क्रमात्॥ तृ
तीये चतुर्थे षष्ठेष्टमे वा मासि मृगपुनर्वसुपुष्यहस्तानुराधाश्रवणेषु नक्षत्रेषु सीमन्तेन सह कार्यः
॥ कर्ता वितानस्य याय्यां गृहस्य दक्षे कृत्वा प्राग्ग्रीवेरक्ते आनडुहे चर्मणि पत्नीमुपवेश्य देशकालौ सं
कीर्त्यास्यां भार्यायां जनिष्यमाणस्य सर्वगर्भाणां वैजिकगार्भिकदोषनाशपुंरूपताज्ञानाद्यर्थं सि
ध्यर्थं प्रतिरोधिनाशद्वाराश्रीपरमेश्वरप्रीत्यर्थं पुंसवनमनवलोभनं च तथा तनुरुधिरस्त्रिया ३८
लक्ष्मीभूतराक्षसीगणनाशक्षमहालक्ष्मीसमावेशार्थं प्रतिगर्भबीजगर्भजैनोनाशा
र्थं च सीमन्तोन्नयनं चरंस्त्रेणकरिष्ये॥ इति संकल्प्य गणेशपूजापुण्याहवाचनमातृका

पूजानांदीश्राद्धानिकृत्वामंगलसंज्ञंगृह्याग्निंनिधायास्मिन्नाहितेग्नौइत्यादिचभुंक्तेप्रजा
पतिंचरुणातथासीमन्तोन्नयनादौहिरण्मयीतारकांत्रिर्विलुंप्रजापतिंचाज्येनशेषेणास्विष्टकृत
मित्यादिप्रजापतयेलाजुष्टंनिर्वपामीतिनिरूप्यचरुंकृत्वाज्यसंस्कारांतेआत्मानमग्निंचांतरापत्नीमाचांतामानीयस्वरक्षितचर्मण्युपवेश्यतयाअन्वारब्धआज्यभागांतेपत्नीहस्तेसमानव
र्णायाःप्रसृतमितंगोदधितत्रपूर्वोपनीतयवंतत्सार्ध्वयोःहोमाशेषंनिधायकिंपिबसीतिप्रश्नःपृष्टःपुंस
वनमितिसानिरुक्ताप्राश्याचम्यपुनरेवंहिःप्राश्याचामेत्॥ इतिपुंसवनं॥ ॥ततोदूर्वाकल्कं
कन्यायापेषयित्वावस्त्रेगृहीत्वापत्न्याःदक्षिणनासापुटेंगुष्ठानामिकाभ्यांसूक्तद्वयांतेरसंसिंचेत्॥

ॐआतेगर्भोयोनिमेतुपुमान्बाणइवेषुधिं॥आवीरोजायतांपुत्रस्तेदशमास्यः॥१॥करोमितेप्राजापत्यमागर्भोयोनिमेतुते॥अनूनःपूर्णोजायतामस्रेणापिशाचधीताः॥२॥पुमांस्तेपुत्रोनारितंपुमाननुजायतां॥तानिभद्राणिबीजान्यृषभाजनयंतुनः॥३॥यानिभद्राणिबीजान्यृषभाजनयंतिनः॥तेस्त्वंपत्न्यन्विहिसप्रसूर्धेनुकाभव ४ कामःसमध्यतांमह्यमपरातितमेवमे॥यंकामंकामयेदेवंतंमेवायोसमर्धय ५ तथा॥अग्निरेतुप्रथमोदेवतानांसोस्यैप्रजांमुंचतुमृत्युपाशात्॥तदयंराजावरुणोनुमन्यतांयथेयंस्त्रीपौत्रमघंनरोदात्॥१॥इमामग्निस्त्रायतांगार्हपत्यः प्रजामस्यैनयतुदीर्घमायुः॥अशून्योपस्थाजीवतामस्तुमातापौत्रमानंदमभिबुध्यतामियं॥२॥

मातेगृहेनिषिघोषउत्थादन्यत्रत्वत्पतयःसंविशंतु॥मात्वंबिभेरियमभ्यावधिष्टाजीवपत्नीपतिलोकेविराजपश्यंतीप्रजांसुमनस्यमाना २ अप्रजस्तांपौत्रमृत्युंपाप्मानमुतवाघं॥शार्म्मःसजमिवोत्सृज्यद्विषद्भ्यःप्रतिमुंचामिपाशं ३ देवरुतंब्राह्मणकल्पमानंतेनहन्मियोनिषदःपिशाचान्॥ऋव्यादोमृत्युनधरान्पातयामिदीर्घमायुःस्तवजीवंतुपुत्राः ५॥इतिमंत्रैर्नृत्यिदत्तेतामाचम्यचरुमवदायप्रजापतयेस्वाहेतिहुत्वा॥यत्तेसुशीमेहृदयेहितमंतःप्रजापतौ॥मन्येहंमांतद्विद्वांसमाहंपौत्रमघंनियामिति॥पत्न्याहृदयंस्पृष्ट्वासीमंतेसुवेणाज्यंजुहुयात्॥धातादद्दातिहृयोहिरण्यगर्भोधातानुष्टुप्॥अंत्यानुष्टुप्॥

होमेवि॰ॐधातादद्यातुराभुषेप्राञ्चीजीवानुमक्षितं॥वयंदेवस्यधीमहिसुमतिंवाजिनीवतः
स्वाहा॥धात्रेइदं॰॥ओंधाताप्रजानामुतरायईशेधातेदंविश्वंभुवनंजजान॥धातारुक्षीरनि
मिषाभिचष्टेधात्रेइत्थंघृतवज्जुहोतस्वाहा॥धात्रे॰॥राकामहमितिहयोगृत्समदोराका
जगती॥ॐराकामहंसुहवंसुष्टुतीहुवेशृणोतुनःसुभगाबोधतुत्मना॥सीव्यत्वपःसूच्या
छिद्यमानयाददातुवीरंशतदायमुक्थ्यंस्वाहा॥राकेदं॰ॐयास्तेराकेसुमतयःसुपेश
सोयाभिर्ददासिदाशुषेवसूनि॥ताभिर्नोअद्यसुमनाउपागहिसहस्रपोषंसुभगेररणा
स्वा॰॥इतिहे॥नेजमेषेतित्रयाणांत्वष्टाविष्णुरनुष्टुप्॥नेजमेषपरापतसुपुत्रःपुनरापत॥

अस्यैमेपुत्रकामायेगर्भमाधेहियःपुमान्स्वाहा॥विष्णु॰॥यथेयंपृथिवीमह्युत्तानागर्भमा
धे॥एवंतंगर्भमाधेहिदशमेमासिसूतवेस्वाहा॥विष्णव॰प्रजापतेनत्वदेतान्यन्योविश्वा
॥पत्न्याःपश्चात्तिष्ठन्॥उदुंबरशाखयात्रिःशुक्रशालक्रीकृत्यत्रयेणीकृतेनभ्रूमध्यादारभ्य
एवं व्याहृतीनांप्रजापतिःप्रजा॰सृजति॥ॐभूर्भुवःस्वरोमितिऊर्ध्वमंत्रादृत्यात्रिश्चतु
र्वासीमंतंव्यूह्यगुल्फंतत्रैवसंस्थाप्य॥गोधूमपिष्टेउंबरफलमात्रंकंवेदत्वासोमंराजा
नंसंगायेतामिति॥वीणागाथिनोद्विजोसंप्रेष्य॥सोमोनोराजावतुमानुषी॥प्रजानिविष्टचक्रा
सागंगेइतिसमीपनदीनाम्नात्रिर्गायेतांविष्टकृतादिशेषंसमाप्य ब्रह्मणेमस्मैवाशृषदस्मि

णांदत्वाफलतंडुकादितद्दत्त्वेदत्वाशतंविप्रान्भोजयेत्॥ ॥इतिकमलाभट्टकृतपुंसवनान
वलोभनसीमंतप्रयोगः॥ ॥अथजातकर्म॥पुत्रेजातेपितासचेत्तंस्नात्वादेशकालौसंकीर्त्य
अस्यकुमारस्यगर्भमलापानजन्यदोषनाशायुर्मेध्याभिवृद्धिंबीजगर्भजनितनाशद्वाराश्री
परमेश्वरप्रीत्यर्थंजातकर्मकरिष्ये॥इतिसंकल्प्यगणेशपूजापुण्याहवाचनमातृकापूजानां
दीश्राद्धानिकृत्वाहोमपर्यंतंव्याहृतिभिःप्रबलसंज्ञंअग्निंप्रतिष्ठाप्यतत्राग्निमिंद्रंप्रजाप
तिंविश्वान्देवान्ब्रह्माणंचाज्येननामभिर्मंत्रेणकृत्वाष्विष्टकृदादिकृत्वामधुघृतेहिरण्येना ४१
वघृष्य॥ॐप्र[illegible]तेरग्निमधुनोघृतस्यवेरसवित्राप्रसूतंमघोनां॥आयुष्मानुत्तोदेवता

मिःशतंजीवशरदोलोकेअस्मिन्नितेनेवप्रायुषिवाहिरण्यंप्रक्षाल्यअग्नेरुत्तरेणकर्णे
सव्यकर्णेनिधायतन्मुखसमीपेस्वमुखमानीय॥ॐमेधांतेदेवःसवितामेधांदेवीसरस्वती॥मे
धांतेअश्विनोदेवावाधत्तांपुष्करस्रजाविति[illegible]मंत्रावृत्तिः॥ततःश्रीखंडेसोयुगपदभिमृश्य॥अश्मा
भवपरशुर्भवहिरण्यमस्तृतंभव॥वेरोवैपुत्रनामासिसजीवशरदःशतं॥इंद्राग्नेष्णमिगृत्समदऋ
ष्टिस्त्रिष्टुप्॥अंसा०॥ॐइंद्राग्नेष्णानिद्रविणानियेहिचित्तिरक्षस्यसुभगत्वमस्मे॥पोषंरयीणाम
रिष्टिंतनूनांस्वाद्यानंगवःसुदिनत्वमह्नां॥अस्मेप्रयंधिमघवन्नजीषिंनिंद्राणोविश्ववारस्य
भूरेः॥अस्मेशतंशरदोजीवसेधाअस्मेवीरान्छतदंद्रशिप्रिन्॥इतिचद्वौजपेत्॥ततः॥अंगा

दंगात्संभवसिहृदयादधिजायसे॥आत्मावैपुत्रनामासिसजीवशरदःशतमितिमूर्धानमाघ्रा
य॥इमांकुमारोजरांधयतुदीर्घमायुःप्रजीवसे॥अस्मेसतौप्रपुनाअपुर्वचेयिशोबलमितिस्त
दक्षिणास्तनंप्रक्षाल्यदद्यात्॥ततःकरिष्यमाणंनामस्मरेदिति केचित्॥इतिजातकर्म॥ ॥अथष
ष्ठीपूजा॥॥पंचम्यांषष्ठ्यांचरात्रौपितोरशकालौस्मृत्वाःस्यशिशोःसूतिकायाश्चसर्वारिष्टशांत्या
पुण्याह्यसिध्यर्थंजन्मदोषशांत्यायुर्जीवंतिजीवकायाःस्कंदस्यमातृकादीनांचपूजांकरिष्येयुक्का
गणेशंसंपूज्यकलशंसंस्थाप्यतत्रप्रतिमास्वक्षतपुंजेषुगणेशंजन्मदाःजीवंतिकांस्कंदंमातृका
नलिंसिनीवालिंकुहूंकुंजेलिखितांषष्ठीशल्लेभगवतीचावाह्य॥तदस्तुमित्रावरुणा॥॥गृहीवेप्र

तिष्ठा॥इतिप्रतिष्ठाप्य॥षोडशोपचारैःसंपूज्यदधिभक्तंनिवेद्यदीपान्माषभक्तबलीन्दत्वाप्रार्थये
त्॥मौरीपुत्रोयथास्कंदःशिशुत्वेरक्षितःपरा॥तथामामाप्ययंबालःसर्वदारक्षितोनमः॥विप्रान्संपू
ज्यखाद्यदक्षिणादित्वारात्रौजागरणंकार्यं॥ ॥इतिषष्ठिपूजा॥ ॥अथनामकर्म॥ ॥एका
दशेद्वादशेष्टादशेएकत्रिंशत्तमेएकाधिकशततमेवान्यिग्रह्यज्ञादिकृत्वादशकालेसंकीर्त्यास्य
शिशोःबीजगर्भजदोषनाशायुर्वृद्धिःनामव्यवहारसिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंनामकरणं
करिष्येइत्युक्त्वागणेशपूजापुण्याहवाचनमातृकापूजनांदीश्राद्धानिकृत्वाकांस्यादिपात्रेतंदु
लपूर्णेहेम्नागणेशनामततोमासनाम॥कृष्णोनंतोच्युतश्चक्रीवैकुंठोथजनार्दनः॥उपेंद्रो

यज्ञपुरुषोवासुदेवस्तथाहरिः॥योगीशःपुंडरीकाक्षोमासनामान्यनुक्रमात्॥इतिचैत्रादिमा
र्गशीर्षादिशुक्लेमेणकृत्तानक्षत्रपादादिवर्णवशेनरोहिणइत्यादिनाक्षत्रममुकममुकनाम्ना
त्यमुकोसीत्युक्त्वाव्यवहारिकंव्यक्षरंचतुरक्षरंवयुग्माक्षरंवाविषमाक्षरंस्त्रीपुंवाविप्रादिवर्णक्र
मेणशर्मवर्मगुप्तदासान्यतमंविलिख्यतदस्त्वित्युक्त्वानामदेवताभ्योनमइतिसंपूज्य॥शि
शोर्दक्षिणकर्णेअमुकनाम्नात्वममुकोसिइत्युक्त्वाकृतांजलिःअमुकनामायेभवतःसर्वा
न्ब्राह्मणानभिवादयतेआयुष्मान्भवत्वममुकइतिविप्राः॥एवंमासनाम्नाव्यवहारिकेणना ४२
म्ना॥इत्यादिवाक्यं॥दत्ताविप्राभोज्याः॥ ॥इतिनामकर्म॥अथनामदिनेषोऽग्न्यस्मिन्वा

शुभेदिनेकुलदेवतांयोगशायिनंहरिंचसंपूज्यमंगलगीतैःप्रेखेशिशुंस्वापयेत्॥द्वितीयेएक
त्रिंशेन्यस्मिन्वाशंखेनदुग्धंपाययेत्॥ततोद्वादशेषोऽग्नोवान्यिषष्ठसप्तमेष्टमेवामासिविष्णुब्र
ह्मशिवचंद्रसूर्यादिगीशाग्निसरस्वतीकुलदेवतागोविप्रान्संपूज्योदक्मुखस्यशिशोःकर्णौवे
धयेत्॥अथनिष्क्रमणान्नप्राशयेत्॥तृतीयेचतुर्थेषष्ठेष्टमेवामासेपितरौशकालोसंकीर्त्य
शिशोरायुरारोग्यश्रीद्युधिविजगर्भजदोषनाशार्थंबलाबुर्यशोवर्चोभिवृध्यर्थंनिष्क्रमणंस्व
र्यावलोकनंसुपवेशनंतथामातृगर्भमलप्राशनशुध्यन्नाद्यब्रह्मचर्यसतेजइंद्रियायुवृध्य
र्थंचशीघरमेऽन्नेप्राशनंचतंत्रेणकरिष्येइत्युक्त्वागणेशपूजापुण्याहवाचनमातृकापूजा

नोरीश्वात्यानिकृत्वा॥स्वस्तिनआत्रेयोविश्वेदेवास्त्रिष्टुप्॥शिशोरंकारोपणेविनि॰॥ॐस्वस्ति
नोमिमीतामश्विनाभगंःस्वस्तिदेव्यदितिरनर्वणः॥स्वस्तिपूषाअसुरोदधातुनःस्वस्तिद्यावापृ
थिवीसुचेतुना॥स्वस्तयेवायुमुपब्रवामहैसोमंस्वस्तिभुवनस्ययस्पतिः॥बृहस्पतिंसर्वगणं
स्वस्तयेस्वस्तयआदित्यासोभवंतुनः॥विश्वेदेवानोअद्यास्वस्तयेवैश्वानरोवसुरग्निस्वस्तये॥
देवाअवंतुभवस्वस्तयेस्वस्तिनोरुद्रःपातंहसः॥स्वस्तिमित्रावरुणास्वस्तिपथ्येरेवति॥स्वस्तिन
इंद्रश्चाग्निश्चस्वस्तिनोअदितेकृधि॥स्वस्तिपंथामनुचरेमसूर्याचंद्रमसाविव॥पुनर्ददताघ्ना
ताजानतासंगमेमहि॥इतिअंकमारोप्य॥आशुःशिशानस्त्रयोरश्वास्त्यात्रिरथसूक्तस्यंइ

प्रतिरथस्त्रिष्टुप्॥चतुथ्रऋहतीदेवतात्रयोरश्वनुष्टुप्॥शिशोरायुष्याभिरध्यर्थेजपेविनि॰॥ॐ
आशुःशिशानोवृषभोनभीमोघनाघनःक्षोभणश्चर्षणीनां॥संक्रंदनोनिमिषएकवीरःशतं
सेनाअजयत्साकमिंद्रः॥संक्रंदनेनानिमिषेणजिष्णुनायुत्कारेणदुश्च्यवनेनधृष्णुना॥तदिंद्रे
णजयततसहध्वंयुधोनरःषुहस्तेनवृष्णा॥सवृषहस्तैःसनिषंगिभिर्वशीसंस्रष्टासयुधइंद्रो
गणेन॥संसृष्टजित्सोमपाबाहुशर्ध्युग्रधन्वाप्रतिहिताभिरस्ता॥बृहस्पतेपरिदीयारथेनर
क्षोहामित्रांअपबाधमानः॥प्रभंजन्सेनाःप्रमृणोयुधाजयन्त्साकमेध्यवितारथानां॥बल
विज्ञायस्थविरःप्रवीरःसहस्वान्वाजीसरमानउग्रः॥अभिवीरोअभिसत्वासहोजोजैत्रमिंद्ररथमा

तिष्ठगोवित्॥गोत्रभिदंगोविदंवज्रबाहुंजयंतमज्मप्रमृणंतमोजसा॥इमंसजाताअनुवीर
यध्वमिंद्रंसखायोअनुसंरभध्वं॥अमिगोत्राणिसहसागाहमानोदयोवीरःशतमन्युरिंद्रः॥
गुभ्यवनःपृतनाषाह्युध्योऽस्माकंसेनाअवतुप्रयुत्सु॥इंद्रआसांनेताबृहस्पतिर्दक्षिणा
यज्ञःपुरएतुसोमः॥देवसेनानामभिभंजतीनांजयंतीनांमरुतोयंत्वग्रे॥इंद्रस्यवृष्णे
स्यराज्ञआदित्यानांमरुतांशर्धउग्रं॥महामनसांभुवनच्यवानांघोषोदेवानांजयतामुदस्था
त्॥उध्वर्षयमघवन्नायुधान्युत्सत्वनांमामकानांमहांसि॥उदृत्रहन्वाजिनान्वाजिनान्यु ४८
द्रथानांजयतांयंतुघोषाः॥अस्माकमिंद्रःसमृतेषुध्वजेष्वस्माकंयाइषवस्ताजयंतु॥अ

स्माकंवीराउत्तरेभवंत्वस्मांउदेवाअवताहवेषु॥अमीषांचित्तंप्रतिलोभयंतीगृहाणांगान्य
पेपरोहि॥अभिप्रेहिनिर्दहहृत्सुशोकैरंधेनामित्रास्तमसासचंतां॥प्रेताजयतानरइंद्रोवः
शर्मयछतु॥उग्राबाहवोनाधृष्यायथासथ॥इतिसूक्तंजपित्वा॥तच्चक्षुर्वसिष्ठः
सूर्यःपुरउद्गिरन्॥कुमारस्यादित्योवेक्षणेवि०॥तच्चक्षुर्देवहितंपुरस्ताच्छुक्रमुच्चरत्॥पश्येमश
रदःशतंजीवेमशरदःशतं॥इतिसूर्यमीक्षयेत्॥ततःपीठप्रतिमासुतंडुलपुंजेषुवाइंद्रा
दिलोकपालान्स्वस्वाद्यादिशाः॥चंद्रार्कवासुदेवगगनंवराहभूमीःसपूज्यतन्मंत्रैर्नामभि
र्वीचरुंकृत्वा॥शिशुमभ्येनसतूर्णं॥दर्पणकरुशःकन्यानथासुमनसाक्षताः॥दीपमाला

ध्वजोलाजाःसंप्रोक्तंचाष्टमंगलं॥इत्येवंमंगलाष्टकपुरःसरंबहिर्नीत्वाकनिक्रदादिसूक्तं
पठेत्॥ॐकनिक्रदज्जनुषंप्रब्रुवाणइयर्तिवाचमरितेवनावं॥सुमंगलश्चशकुनेभवासिमा
त्वाकाचिदभिभाविभ्याविदत्॥मात्वायेनउदधीन्पासुपर्णोमात्वाविदद्दिषुमान्वीरोअ
स्ता॥पित्र्यामनुप्रदिशंकनिक्रदत्सुमंगलोभद्रवादीवदेह॥अवक्रंदद्क्षिणतोगृहाणांसु
मंगलोभद्रवादीशकुंते॥मानस्तेनईशतमाघशंसोध्रुवाद्दमविदथेसुवीराः॥प्रदक्षिणिद
भिगृणंतिकारवोवयोवदंतऋतुथाशकुनयः॥उभेवाचौवदतिसामगाइवगायत्रंचत्रैष्टु ४६
भंचानुराजसि॥उद्गातेवशकुनेसामगायसिब्रह्मपुत्रइवसवनेषुशंससि॥हंसोवाजी

शिखमतीरपीच्यासर्वतोनःशकुनेभद्रमावदविश्वतोनःशकुनेपुण्यमावद॥आवंदस्त्वंशकुने
भद्रमावदतूर्ष्णीमासीनःसुमतिंचिकित्विनः॥यदुत्पतन्वदसिकर्करिर्यथाबृहद्वदेमविदथेसुवीरा
युः॥ ॥इतिकन्यादानप्रयोगः॥ ॥अथविवाहहोमः॥ ॥प्राणानायम्यदेशकालौस्मृत्वा
स्यांगृहीतायांवध्वाभार्यांतसिध्यर्थंगृह्याग्निसिध्यर्थंचविवाहहोमंकरिष्ये॥तदंगतयास्थं
डिलोल्लेपनाद्यग्निस्थापनांतेअग्नेःप्रत्यक्षूदपरंस्रोपलंप्रतिष्ठाप्य॥अग्नेरीशानेउदकुंभं॥
उदगग्रैःसप्ततंउलराशाउपकल्प्य॥अन्वाधानं॥अस्मिन्नन्वाहृतेग्नावित्यादिआधारांते
नात्रचक्षुषी॥अत्रप्रधानं॥त्रिरग्निंपवमानंअग्निंप्रजापतिंचाज्येन॥अर्यमाग्निंवरुणाग्नि
पूषाग्निंप्रजापतिंचलाजद्रव्येणशेषेणास्विष्टकृतमित्यादिआधारांते॥अग्नआयूं

षीतितिसृणांगृत्तंवेखानसाऋषयः॥अग्निःपवमानोदेवता॥गायत्रीछंदः॥विवाहप्रधा
नाज्यहोमेविनियोगः॥ॐअग्नआयूंषिपवस॰आसुवोर्जमिषंन॰आधेहिरयिं॰मयि
ॐअग्निर्ऋषिः॰पवमानोदेवता॰गायत्रीछंदः॰षड्जःस्वरः॰इमंनोयज्ञं॰नयत्वं॰
देवेषु॰गन्तारंयज्ञं॰गन्धर्वोदेवता॰निचृद्गायत्रीछंदः॰षड्जःस्वरः॰इमंनोयज्ञं॰
नयत्वं॰देवेषु॰ॐअग्नेपवस्वः॥दधद्रयिं॰स्वाहा॥अग्न
येप॰॥त्वमर्यमाभवसिश्रुतोग्नेस्त्रिष्टुप्॥विवाहप्र॰॥ॐत्वमर्यमाभवसियत्कनीनां
मस्वधाव॰स्तुत्यंबिभर्षि॥अंजंतिमित्रंसुधितंनगोभिर्यद्दंपतीसमनसाकृणोषिस्वा॰
अग्नय॰॥प्रजापतेहिरण्यगर्भःप्रजापतिस्त्रिष्टुप्॥विवाहप्र॰॥ॐप्रजापतेन॰स्वा॰
प्रजापतय॰॥ततःपश्चमाभिमुखंस्थित्वा॥गृभ्णामितेसूर्यासावित्रीसूर्यासावित्री

त्रिष्टुप्॥भार्यात्वसिद्धयेपाणिग्रहणेवि॰॥ॐगृभ्णामितेसौभगत्वायहस्तंमयापत्या
जरदष्टिर्यथासः॥भगोअर्यमासवितापुरंधिर्मह्यंत्वादुर्गार्हपत्यायदेवाः॥तांपूषंछि
वतमामेरयस्वयस्यांबीजंमनुष्यावपंति॥यानऊरूउशतीविश्रयातेयस्यामुशं
तःप्रहरामशेषं॥तुभ्यमग्नेपर्यवहन्सूर्यांवहतुनासह॥पुनःपतिभ्योजायांदाअग्ने
प्रजयासह॥पुनःपत्नीमग्निरदादायुषासहवर्चसा॥दीर्घायुरस्यायःपतिर्जरद
ष्टिर्यथासः॥तं॥सोमःप्रथमोविविदेगंधर्वोविविदउत्तरः॥तृतीयोअग्निष्टेपतिस्तु
रीयस्तेमनुष्यजा॥इतिउक्त्वानेनहस्तेसांगुष्ठंकरंगृहीत्वा॥वध्वंजलावुपस्तीर्यभ्रा

१२

ताहिर्लाजानावपतिस्रिःपंचावत्तिना॥ हविरवत्तेचाभिघार्य॥अर्यमणंवरुणंपूषणमित्रं
यार्णमंत्राणांवामदेवोर्यमाग्निर्वरुणाग्निःपूषाग्निरनुष्टुप्॥विवाहप्रधानलाजहोमवि॰॥ॐअ
र्यमणंनुदेवंकन्याअग्निमयक्षत॥सइमांदेवोअर्यमाप्रेतोमुंचातुनामुतस्वाहा॥तिष्ठंती
मुदुयात॥अर्यमोग्नयइदं॰॥अमोहमस्मिसात्वंसत्वमस्यमोहंद्यौरहंपृथिवीत्वंसामाहम्
ऋक्तावेहसं वहावहै॥प्रजांप्रजनयावहैसंप्रियोरोचिष्णूसुमनस्यमानोजीवेवशरदःशतं
मितिनतोवधूःप्राञ्जलीह्याभ्यामपिपादाभ्यांदधदं॰॥इममश्मानमारोहास्मेवत्वंस्थिराभव॥ १२
सहस्वपृतनायतोभितिष्ठपृतन्यतःइतिमंत्रेणारोपयेत्॥उपस्तरणादिपूर्ववत्॥वरुणंनुदेवंक

१ पक्ष

न्या॰॥वरुणाग्नयइ॰॥अमोहमस्मि॰इममश्मानमा॰॥पुनर्लाजानवदाय॥पूषणंनुदेवंक॰
पूष्णेग्नयइ॰॥अमोहमस्मि॰॥इममश्मान॰॥प्रजापतयेस्वाहेतिभूर्पकोणेनचतुर्थंनूम्पी॥
ततःयद्दिकेशंबध्नीतदा॥प्रत्वामुंचामिवरुणस्यपाशाद्येनत्वाबध्नात्सवितासुशेवः॥ऋतस्य
योनोसुकृतस्यलोकेरिशंत्वासहपत्यादधामीतिदक्षिणा॥प्रेतोमुंचातुनामुतःसुबद्धाममुत
स्करं॥यथेयमिंद्रमीढ्वःसुपुत्रासुभगासति॥ऊत्तराश्वाविमुच्येशान्यांसप्तनंगुलपुंजेषु॥इषए
कपदीभव॥सामामनुव्रताभव॥पुत्रान्विंदावहैबहूंस्तेसंतुजरदष्टयः॥ऊर्जेद्विपदीभव॥सा
मामनु॰॥रायस्पोषायत्रिपदीभव॥सामामनु॰॥मायोभव्यायचतुष्पदीभव॥सामामनु॰

प्रजाभ्यः पंचपदीभव॥ सामामनु०॥ ऋतुभ्यः षट्पदीभव॥ सामामनु०॥ सखासप्तपदीभव॥ सामा
मनु०॥ उभयोः संनिधायशिरसीउदकुंभेनावसिच्य॥ ग्रंथिरस्त्वितिउक्त्वा॥ ध्रुवंपश्य॥ अरुंधतीपश्य॥
सप्तऋषीन्पश्य॥ जीवपत्नीप्रजांविंदेयेत्युक्त्वा॥ स्विष्टकृतादिहोमशेषंसमापयेत्॥ इतिविवाहहो
मः॥ ॥ ततःकन्यापितुःप्रार्थनांकृत्वा तन्नेवेदशकालौस्मृत्वाविवाहाग्नेर्गृह्याग्निसिध्यर्थंचगृह
प्रवेशनीयहोमंकरिष्ये॥ तन्नेदंतापरिग्रहार्थमन्वाधानं०॥ अस्मिन्नन्वाहितेग्नावित्यादिच
क्षुषीआज्येनेत्येतेसूर्यासावित्रीं चतुर्वारंआज्येनशेषेणस्विष्टकृतंचक्षुष्यंते॥ आनःप्रजामिति
चतसृणांसूर्यासावित्रीसूर्यासावित्री॥ आद्याजगती॥ द्वितीयात्रिष्टुप्॥ अंत्येद्वेअनुष्टुभौ॥

गृहप्रवेशनीयप्रधानाज्यहोमेवि०॥ ॐ आनःप्रजांजनयतुप्रजापतिराजरसायसमनक्त्वर्य
मा॥ अदुर्मंगलीःपतिलोकमाविशशन्नोभवद्विपदेशंचतुष्पदे॥ स्वाहा॥ सूर्यासावित्र्याइदं०॥ ॐ
अघोरचक्षुरपतिघ्न्येधिशिवापशुभ्यःसुमनाःसुवर्चाः॥ वीरसूर्देवकामास्योनाशन्नोभवद्वि
पदेशंचतुष्पदेस्वाहा॥ सूर्यासावि०॥ ॐ इमांत्वमिंद्रमीढ्वःसुपुत्रान्सुभगंकृणु॥ दशास्यांपुत्रा
नाधेहिपतिमेकादशंकृधि स्वाहा॥ सूर्यासावि०॥ ॐ सम्राज्ञीश्वशुरेभवसम्राज्ञीश्वश्र्यांभव॥
ननांदरिसम्राज्ञीभवसम्राज्ञीअधिदेवृषु स्वाहा॥ सूर्यासावि०॥ इतिकृत्वा॥ समंजंतिसूर्यासा
वित्रीसूर्यासावित्रीअनुष्टुप्॥ हृदयांजनेविनियो० इतिदधिप्राशनीयात्॥ आज्यशेषेणवा

नक्तिरहरये॥स्विष्टकृतादिसमाप्यविप्रान्भोजयेत्॥ ॥इतिग्रहप्रवेशनीयहोमः॥ ॥अथ
चतुर्थदिनेऽरिणीपूजनंदानंच॥ ॥चतुर्थदिनेदेशकालौसंकीर्त्यगणेशंसंपूज्यकन्यादान
स्यसांगतासिध्यर्थंवरस्यनसिद्धमात्रादीनांतत्सखीयाणांचपूजनंकृत्वावधूसीमंतेसुमंगली
रितिसिंदुरंदत्वा॥ॐसुमंगलीरियंवधूरिमांसमेतपश्यत॥सौभाग्यमस्मैदत्वायाथास्तंविप
रेतन॥मांगल्यतंतुनानेतिमंगलसूत्रंबध्नीयात्॥ततःवस्त्रफलतांबूलंदंपत्योर्वंशवर्धनं॥
अरिण्याख्यंवंशपात्रंपक्वान्नैःपरिपूरितं॥करैकरुद्रसंख्यैकैःसुवर्णपीरपूरितैः॥एतावदे
रिणीरूपंकल्पेव्यंकिलसूरिभिरुच्यते॥वंशपात्रं॥अरिणीतमुमादेवीमहेशोगिरिजापति॥

अतस्त्वांपूजयिष्यामीअरिणीसर्वकामदां॥सवस्त्रांचसदीपांचभूषैःषोडशभिर्युतां॥वरमात्रे
प्रदास्यामिकन्यांदानस्यसिद्धये॥इतिपठित्वापूज्य॥वंशपात्रंषोडशभूषैर्युतंवरमा
त्रेसंप्रदद्यात्॥नममेसुखंकापेटह॥वंशोवंशकरश्चैवोवंशोवंशसमुद्भवः॥अनेनवंशदानेनतु
ष्टोहरिर्वंशकरोतुमे॥१॥वंशपात्रमिदंपुण्यंवंशजातसमुद्भवं॥वंशानामुत्तमंदानमतःशां
तिंप्रयच्छमे॥२॥वंशपात्राणिसर्वाणिमयासंपादितानिवै॥उमाकांतायदत्तानिममगोत्रा
भिवृद्धये॥३॥वंशवृद्धिकरंदानंसौभाग्यादिसमन्वितं॥वस्त्रेणाच्छादितंपूगफलैर्हेमसम
न्वितं॥४॥सर्वपापक्षयकरंनानाद्रव्यैस्तुपूरितं॥दानानामुत्तमंदानमतःशांतिंप्रयच्छमे॥५॥॥

ततः॥स्विष्टिनोऽभिमीतास्विति सूक्तेनवरपक्षीयाणांशिरसिनिधाय॥वंशाभिहविरस्तु॥इत्याशि
षंगृहीत्वा॥अष्टवर्षांत्रियंकन्यांपुत्रवत्सालिनामया॥इदानींतुमयात्वभ्यंदत्तास्नेहेनपाल्यतां
इतिवरंके॥तत्पुत्रायेत्यूहेनमातुरंकउपवेशयेत्॥ ॥इत्येणीदानविधिः॥ ॥अथदे
वकोत्थापनं॥गणेशंसंपूज्यकनिक्रदहितिसूक्तेनदेवकस्थापितदेवताआनीयअभ्यंग
पूर्वकंषोडशोपचारैःसंपूज्य॥उत्तिष्ठब्रह्मणस्पतेदेवयंतस्त्वेमहे॥उपप्रयंतुमरुतःसुदान
वइंद्रप्राशूर्भवासचा॥अभ्याणिदद्योनिषिक्तंपुष्करेमधु॥अवतस्यविसर्जने॥इति ९५
विसृज्य॥पुण्याहंवाचयित्वा॥अभिषेकांतेप्रेतिचेतिचेत्येनेनवंशापाश्रेणमातुरंकात्तंशिरसि

शिरसिदद्यात्॥प्रेतिचेतिचेत्येतद्देसर्वंस्वस्त्ययनंयत्रेतिचेतिचेतितद्योस्यप्रियस्यात्तमेतेनानु
मंत्रयेतप्रेतिचेतिचेतिस्वस्त्येवगच्छतिस्वस्तिपुनरागच्छति॥वंशाभिहविंवाचयीत॥ततोवरः च
तुर्थेपंचमेसप्तमेवाह्निवधूं॥पूषात्वेतोनयतुहस्तगृह्येति॥पूषात्वेतोनयतुहस्तगृह्याश्विना
त्वाप्रवहतांरथेन॥गृहान्नाछगृहपत्नीयथासोवशिनीत्वंविदथमावदासि॥इहाग्नियंप्रजयाते
समृध्यतामस्मिन्गृहेगार्हपत्यायजागृहि॥एनापत्यातन्वंसंसृजस्वाधात्रीविश्वमाव
राथः॥नीललोहितंभवतिकृत्यासक्तिर्व्यज्यते॥एधंतेअस्याज्ञातयःपतिर्बंधेषुबध्यते॥
पराद्देहिशामुल्यंब्रह्मभ्योविभजावसु॥कृत्येषापद्वतीभूत्वाजायाविशतेपतिं॥यानमा

ऐहयेत्॥अश्मन्वतीरीयतेसंरभध्मुत्तिष्ठतप्रतरतासखायः॥इत्यर्धेनानडमारोहयेदुत्तरेणपा
णिमुत्तार्यरुदंत्योजीवरुदंतीतिजपेत्॥जीवंरुदंतिविमयंतेअध्वरेदीर्घामनुप्रसितिंदीध्ययुर्नरः॥वि
वाहमग्निंप्रत्यक्षंनयंतिनसमारोपेण॥माविदन्परिपंथिनइतिसुदेशेषुवसेत्॥माविदन्परिपं
थिनोयआसीदंतिदंपती॥सुगेभिर्दुर्गमतीतामपद्यंत्वरातयः॥वस्तेो॥सुमंगलीरियंवधूरि
तिकक्षान्॥इहप्रियंप्र०॥प्रतिगृह्यप्रवेश्यगणेशंसंपूज्यपुण्याहंवाचयित्वालक्ष्मीसक्तुमिवतिन
उनेतिषोडशोपचारैःसंपूज्य॥विवाहाग्निंनिधायच॥इहकर्मणिपत्नीमुपवेश्यपूर्वोक्तगृहप्रवेश
नीयहोमंकुर्यात्॥शिष्टास्तुश्वशुरगृह्यवकुर्वंति॥ततोमंडपोद्वासनंप्राग्वत्कुर्यात्॥ ॥इतिगोभिल्ल

॥अथौपासनप्रयोगः॥ ॥कर्तारलीमा
त्रेषोडशांगुलेस्कंधांतरपिशलमात्रेवात्रिद्व्यंगुलंत्रिमेखलेवाकुंडे वक्ष्यमाणविधिनासंस्कृते
ग्निंप्रतिष्ठाप्यप्रत्यवरोहतिमंत्रेणप्रत्यवरोह्य॥सिध्यंवासायमधिदृक्षेप्रातरुदयात्प्रागग्निंप्रा
युक्षत्यसायंसध्यंतेदेशकालौसंकीर्त्यश्रीपर॰सायमौपासनहोमंकरिष्येऽमुक्का॥चत्वारि
शृंगेतिध्यात्वा॥ॐचत्वारिशृंगा॰सप्त॰अस्य॥त्रिधाबद्धो॰आविवेश॥त्रिःपरिसमुह्यपरिस्तृ
र्यपर्युक्ष्योत्तरतोग्नेतंडुलान्दर्भेणोज्वाल्यप्रोक्ष्यतथैवत्रिःपर्यग्निकृत्वोल्मुकंनिरस्यापउ
पस्पृश्येत्॥पश्चादग्नेःहविःसमिधंचनिधाय॥विश्वानिनइतिहाभ्यामग्निमभ्यर्च्य॥ॐविश्वा

निनोदुर्ग॰पर्षि॥अग्नेअत्रिव॰ननूनां॥यस्त्वाहृद्दा॰जोहवीमि॥जातवेदो॰मर्त्या॥तृतीययाव
धांजलिनमस्कृत्य॥यस्मैतंसुकृतेजा॰अग्निनंसपुत्रिणं॰संपूज्यदक्षिणांजान्वाच्य॥इमंमीस
मिधमाधायापस्पृष्ट्वा॥शतंषष्टिवातंदुःखानारायद्हृदिसंनिधाय॥ॐअग्नयेस्वाहेतिसायं
॥सूर्यायस्वाहेतिप्रातः॥कनिष्ठामूलेनहुत्वाएवंप्रजापतयेस्वाहेतिद्वितीयं॥हुत्वा॥परिसमूह्य
पर्युक्ष्य॥सायंअग्नआयूंषीतितिसृभिः॥अग्नेत्वंनइतिचतसृणांगोपायनासोपायनावाबंधुः
सुबंधुःश्रुतबंधुर्विप्रबंधुश्चैकैकर्चोऋषयः॥अग्निर्देवतागायत्रीछंदः॥अग्नआयूंषि
पवस॰सुंचनः॥आरेबा॰नो॥अग्निर्ऋषिः॰तः॥तमीमहे॰गयं॥अग्नेपवस्व॰सुवीर्यं॥दधद्रयिं

यिंपोषं॥अग्नेत्वंनोअंतमउतत्रातास्शिवोभवावरूथ्यः॥वसुरग्निर्वसुश्रवाअच्छानक्षिद्यु
मत्तमंरयिंदाः॥सनोबोधिश्रुधीहवमुरुष्याणोअघायतंसमस्मात्॥तंत्वाशोचिष्ठदीदिवःसु
म्नायनूनमीमहेसखिभ्यः॥इतिसायं॥सूर्योनोदिवस्पातुवातोअंतरिक्षात्॥अग्निर्नःपा
र्थिवेभ्यः॥शोषासवितर्यस्यतेहरःशतंसवोअहंति॥पाहिनोरिषुतःपतंत्याः॥चक्षुनोदेवः
सविताचक्षुर्नउतपर्वतः॥चक्षुधातादधातुनः॥चक्षुर्नोधेहिचक्षुषेचक्षुर्विख्येतनूभ्यः॥सं
चेदंविचपश्येम॥सुसंदृशंत्वावयंप्रतिपश्येमसूर्य॥विपश्येमनृचक्षसः॥उदुत्यंजातवेद
संदेवंवहंतिकेतवः॥दृशेविश्वायसूर्यं॥चित्रंदेवानामुदगादनीकं॥चक्षुर्मित्रस्यवरुणा

स्यचक्षसेमहोदेवायनमस्तंसपर्यत॥इरेमस्योदेवजातायकेतवेहरिवस्युत्रायसूर्यायशंसत॥इतिप्रा
तः॥प्रजापतेनत्वदेतान्यन्योविश्वाजातान्यभिसंबभूव॥यत्कामास्तेजुहुमस्तन्नोअस्तुवयंस्यामपतयोरयीणां॥
तंतुंतन्वन्नजसोभानुमन्विहिज्यायांसमक्षितंपोरुषध्यायाकृतान्॥अनुल्बणंवयतजोगुवामपोमनुर्भवजनयादैव्यंजनं॥इत्युभ
यंप्रजापतिंचोपस्थाय॥मानस्तोकइतिविभूतिंधृत्वा॥ॐनमइत्युपस्थायनामगोत्रेउक्त्वा
भिवादयेत्॥इत्युपासनहोमः॥ ॥अथभैरर्कविवाहस्यानुष्ठानार्हप्रयोगस्यानुक्रमात्सं
भिधीयते॥वरःकृतनित्यक्रियोरविवासरेहस्तनक्षत्रेअन्यस्मिन्वाशुभेन्हिग्रामास्राच्यां ९८
वार्कंगत्वोदगयनकालेसंकीर्त्यममतत्तीयप्रानुषीपरिणयनंजनितसर्वारिष्टशांत्यर्थंअर्कविवाहं

करिष्ये॥तदंगतयादौगणेशपूजनंस्वस्तिवाचनमातृकापूजननांदीश्राद्धानिकृत्वा॥आचा
र्यंवृणुयात्॥तत्रआचार्योवरोवाआकल्पेनैनिमंत्रणअर्कछाययासहितंसूर्यमावाह्य॥षो
डशोपचारैःसंपूज्य॥गुडोदनंनैवेद्यंसमर्प्यवस्त्रेणतंतुभिश्चावेष्टयप्रार्थयेत्॥त्रिलोकवा
सिन्सप्ताश्वःछाययासहितोरविः॥तृतीयाद्यहनंदोषंनिवारयसुखंकुरु॥ततोवरःजलमा
दायत्रिःप्रदक्षिणंपरिषिंचेदभिमंत्रैः॥ममप्रीतिकरायेयंमयासृष्टपुरातनी॥अर्कजाब्रह्मणा
सृष्टाअस्माकंपरिरक्षतु॥नमस्तेमंगलेदेवीनमःसवितुरात्मजे॥त्राहिमांकृपयादेवीपत्नीत्वंमे
इहागता॥अर्कस्त्वंब्रह्मणासृष्टःसर्वप्राणिहितायच॥वृक्षाणामादिभूतस्त्वंदेवानांप्रीति

वर्धनं॥तृतीयोद्वाहजंपापंमृत्युंचाशुविनाशय॥ततोवरः वाग्दानस्थानीयंपुनरर्कस्यपूज
नंकृत्वावाग्दानंकुर्यात्॥तत्रायंक्रमः॥स्वगोत्राद्युक्त्वाकाश्यपावत्सारनैध्रुवेतित्रिप्रवरान्वि
तकाश्यपगोत्रोत्पन्नोआदित्यस्यप्रपौत्रीसवितुःपौत्रीममामुकशर्मणःपुत्रीममुकनाम्नीक
न्यां॥अमुकप्रवरोपेतायामुकगोत्रोत्पन्नायामुकप्रपौत्रायामुकपौत्रायामुकपुत्रायामुकना
म्नेवरायार्ककन्यांदास्येइति॥ततःआचार्योमधुपर्कंकारयित्वा॥मुहूर्तेकन्यांनिरीक्ष्य॥
स्वस्तिनोमिमीतामितिसूक्तं॥ॐस्वस्तिनोमिमीता॰अनर्वणः॥स्वस्तिपूषाअसुरो॰चेतुना॥
स्वस्तयेवायुमुपब्रवा॰स्यतिः॥बृहस्पतिंसर्वगणं॰भवंतुनः॥विश्वेदेवानोअद्या॰स्वस्तये॥

देवाअवन्त्वभवस्व॰तंहसः॥स्वस्तिमित्रावरुणेति॥स्वस्तिनइं॰द्रुधि॥स्वस्तिपंथामनु॰दिव
पुनर्दत्तामघवद्भ्यःसुवाचं॰मेमहि॥इतिपठित्वाआचार्येणार्ककन्यादानंकारयेत्॥तत्रायं
क्रमः॥वाग्दानवत्॥स्वगोत्राद्युच्चार्यआत्मनश्चायथासहितसवितृप्रीतयेइमांअर्ककन्यां
सवस्त्रांतुभ्यमहंसंप्रददे॥नममेत्युक्त्वावरहस्तेजलंक्षिप्त्वामंत्रंपठेत्॥अर्ककन्यामिमां॰
वरःस्वस्तीत्युक्त्वास्वशाखोक्तांकामस्तुतिंपठेत्॥ततःकृतस्यैतद्दानकर्मणःसंपूर्णतासिध्य
र्थंइमांरक्षिणांसंप्रददेइतिहिरण्यंदद्यात्॥ततोगायत्र्यात्रिरावृत्यापंचकृत्वोर्कवरंचसूत्रेणा
वेष्यतत्सूत्रंद्वेधाकृत्वाएकंगायत्र्यार्कस्कंधेबध्वा॥परंवरहस्तेबध्वाआचार्योबध्नीयात्॥मंत्रे

ण॥बृहत्सामस्त्रभृद्वृष्णरश्व्यत्रिष्टुभौजःश्रुभितमुग्रवीरं॥इंद्रस्तोमेनपंचदशेनमध्यमिदं
वातेनसगरोणरक्ष॥ततोर्कस्यचतुर्दिक्षुमहीद्यौरित्यादिमंत्रावृत्याचतुरःकलशेसंस्थाप्य॥
तत्रप्रतिकुंभंइंद्रंविष्णुरितिमंत्रेणविष्णुंसंस्थाप्य॥प्रतिकुंभंषोडशोपचारैःसंपूज्य॥अर्कोत्त
रस्थंडिलेग्निंप्रणीयास्मिन्नन्वाहितेग्नावित्यादिआघारांतंकृत्वात्रप्रधाने॥बृहस्पतिंअग्निं॥
अग्निं॥वायुं॥सूर्यं॥प्रजापतिंचआज्येन॥शेषेणास्विष्टकृतमित्यादियस्येतंमुक्त्वा॥संगोभि
रंगिरोबृहस्पतिस्त्रिष्टुप्॥अर्कविवाहप्रधानआज्यहोमे॰ॐसंगोभिरंगिरसोनक्षमाणोभग २००
इवेदर्यमणंनिनाय॥जनेमित्रोनदंपतीअनक्तिबृहस्पतेवाजयाशूंरिवाजौस्वाहा॥॥बृहस्प

तयइदं॰॥यस्मैत्वाकामकामायवयंसम्राज्यजामहे॥तमस्मभ्यंकामंदत्वाथेरत्वंघृतंपि
बस्वाहा॥अग्नयइदं॰यस्तसमस्तव्याहृतिभिर्हुत्वाहोमशेषंसमापयेत्॥आचार्यंसंपू
ज्यतस्मैगोयुग्मंदक्षिणांदत्वापुनस्त्रिप्रदक्षिणीकृत्यप्रार्थयेत्॥मयाकृतमिंकर्मस्था
वरेषुजरायुणा॥अर्कोपत्याग्निनोरहितत्सर्वंकर्तुमर्हसि॥ततोमहाशांतिंपठेयुः॥अस्मिन्
कर्मणिदशविप्रान्भोज्याः॥त्रयोवा॥यथाशक्तिभूयसीदत्वा॥ततःश्वतुर्थेदिनेसद्योवापुनर
र्कंसंपूज्य॥उत्तिष्ठब्रह्मणस्पते॰अभ्यारमिदंइयइत्याभ्यांविसृजेत्॥इत्यर्कविवाहप्रयोगः॥
अथस्थालीपाकः॥ ॥मध्यान्हेतत्पूर्ववापर्वण्यतिपत्संधौपूर्वेद्युरन्वाधानंतद्दिनेयागः॥मध्या

न्हाद्ध्वंसंधौतद्दिनेन्वाधानंपरेह्नियागः॥कर्तासमित्समासेपप्रतिपदिसमित्यष्टाङ्गुलंक
निष्ठंचतुरंगुलंमकांगुलंवोच्चंस्थंडिलंकृत्वागोमयेनोल्लिप्ययज्ञियशाकलेनपश्चिमेंगुलंहित्वो
दक्संस्थंप्रादेशमात्रंरेखांकृत्वा॥तद्दक्षिणोत्तरांतयोःप्रागग्रेरेखामध्येतिस्रःप्रागायताउदक्सं
स्थाश्चरेखाःकृत्वाग्नेयपात्राभ्यांपिहितमग्निं॥जुष्टोदमूनाअतिथिर्दुरोणइमंनोयज्ञमुपयाहिविद्वान्॥विश्वाअग्नेअभियुजोविहत्या
शत्रूयतामाभराभोजनानि॥एह्यग्नेराङ्गणोगौतमोग्निस्त्रिष्टुप्॥अग्न्याधानेवि०॥ॐ
एत्यानड्वाहोतानिषीदाद्ध्वःसुपुरएतासवानः॥अवर्तांत्वारोदसीविश्वमिन्वेयजामहेसौ

मनसायरेवान्॥इतिमंत्राभ्यामभ्यात्ममक्षेतेरणिमादाय॥व्याहृतीनांप्रजापतिःप्रजापति
र्बृहती॥अग्निप्रति॰ॐभूर्भुवस्वरोमग्निप्रतिष्ठाप्य॥चत्वारिशृंगावामदेवोग्निस्त्रिष्टुप्॥अ
ग्निमूर्तिध्याने॰ॐचत्वारिशृंगात्रयोअस्यपादा॰॥इतिमंत्रेण॥सप्तहस्तश्चतुःशृंगःसप्त
जिह्वोद्विशीर्षकः॥त्रिपात्प्रसन्नवदनःसुखासीनःशुचिस्मितः॥स्रुवंतुदक्षिणेपार्श्वेहविं
वामेस्रुचंतथा॥बिभ्रद्दक्षिणहस्तेस्तुशक्तिमन्नंस्रुचंस्रुवं॥तोमरंव्यजनंवामेघृतपा
त्रंचधारयन्॥आत्माभिमुखमासीनएवंरूपोद्भुताग्निः॥इतिध्यानं॥इदंलौकिकाग्नेस
र्वत्रज्ञेयं॥ततः॥ॐप्रत्यवरोहजातवेदःपुनस्त्वादित्येभ्योहव्यंवहनप्रजानन्॥प्रजांपुष्टिंरयिं

मस्मसुधेत्यथाभवयजमानायशंयोः॥इतिसमारूढसमिधमग्नौक्षिपेत्॥ततस्तत्रधार्ये
ग्नौवाप्रातर्होमंकृत्वाचम्यप्राणानायम्यदेशकालौसंकीर्त्यममोपात्तदुरितक्षयार्थंश्रीपर
मेश्वरप्रीत्यर्थंदर्शपूर्णमासाभ्यांस्थालीपाकाभ्यांयक्ष्ये॥तत्रादावमावास्यायांदर्शनवायक्ष्ये
इतिसंकल्प्य॥समिद्वयमाधायतत्रदेवतापरिग्रहार्थमन्वाधानंक०अस्मिन्नन्वाहितेग्नौजात
वेदसमग्निमिध्मेनप्रजापतिंप्रजापतिंचाघारेदेवतेआज्येनाग्नीषोमौचक्षुषीआज्येनात्र
प्रधानं॥अग्निं॥अग्नीषोमौचरुहव्येणदर्शेतु॥अग्निं॥इंद्राग्नीचरुहव्येणश्रोषणास्विष्ट
कृतमग्निमिध्मसंनहनेनहरंअयासमग्निंदेवान्विष्णुअग्निंवायुंसूर्यंप्रजापतिंचएताः

१०२

प्रायश्चित्तदेवताआज्येन॥ज्ञाताज्ञातदोषनिबर्हणार्थंत्रिवारमग्निंसकृन्महत्याज्येनअंग
देवताःप्रधानदेवताःसर्वाःसन्निहिताःसंतुसांगोपांगेनकर्मणाश्रोसयोमस्थे॥ॐभूर्भुवस्व
स्वाहा॥प्रजापतयइदं॥इध्माबर्हिषोश्वसंनहनं॥दधिघृतपयोमिश्रंहविष्यान्नंखिवसकृ
द्भुंजीतं॥श्राद्धकर्तुःश्राद्धदोषमाषान्नंभुंजीत॥ततःप्रतिपदिप्रातरोपासनंकृत्वाग्निंपरिस
मुह्यपरिस्तरणीयात्॥अग्नेःपोऽग्निरिभेःप्राच्यादिषुपरिस्तृतिः॥युग्मान्प्रादेशमात्रांश्च
पूर्वाग्रान्सर्वरिक्षपि॥कांश्चिदुत्तरतोदर्भानास्तीर्यपरिषिंचति॥दर्भेषूत्तरतोद्वेद्वेपात्राणिसं
चिसादयेत्॥तेऽग्रंभगवानाहश्लोकेनैकेनेत्तिरुत्॥दर्भेषुदक्षिणपाणिभ्यांक्रमेणचरुस्था

ने- सव्य

सी प्रोक्षण्योदर्वस्रुवौ प्रणीताआज्यपात्रेध्माबर्हिषि॥शूर्पेहविष्मानिनउलूखलमुसलंचेतिदे
ईउदगपवर्गंप्राक्संस्थंचत्युत्तान्यासादयेत्॥आज्यमात्रहोमेतु॥प्रोक्षणीस्रुवौप्रणीताआ
ज्यपात्रेध्माबर्हिषीचतथाकुर्यात्॥प्रोक्षणीपात्रमुत्तानंकृत्वाप्रादेशमात्रेदर्भपवित्रेनिधाय
अद्भिःपूरयित्वा॥अंगुष्ठोपकनिष्ठिकाभ्यांत्रिरुत्पूय॥पात्राण्युत्तानानिकृत्वा॥ध्मंचबर्हिस्तृ
॥सर्वाणिपात्राणित्रिःप्रोक्षयेत्॥प्रणीतापात्रमग्नेःप्रत्यङ्निधायतत्रपवित्रेनिधायोदकंपूर
यित्वागंधपुष्पाक्षतांनिक्षिप्य॥अस्मिन्कर्मणिब्रह्मत्वेनत्वामहंवृणेकृताकृतः॥यजमानः॥तं
प्रणीतापात्रेनासिकासमीपेनीत्वोत्तरतोग्नेर्निधायदर्भैराच्छादयेत्॥तेपवित्रेशूर्पेनिधा
य॥अग्नयेत्वाजुष्टंनिर्वपामीतिमंत्रावृत्याव्रीहीणांचतुरोमुष्टीन्निर्वपति॥अग्नीषोमाभ्यांत्वाजु

ष्टंनिर्वपामीतितथैवनिरूप्य॥तेपवित्रेव्रीहीणामुपरिनिधायोत्तानाभिरद्भिःअग्नयेत्वाजुष्टंप्रो
क्ष्यामीतिनिर्वपसंख्ययाप्रोक्षेत्॥एवमग्नीषोमाभ्यां॥दर्शेतु॥अग्नीषोमस्थानेऽग्निभ्यांतथैवप्रोक्षणेविशेषः॥समंत्रकंहोमेतूष्णीनिर्वपप्रोक्षणं॥ततःप्रत्यगग्नीवमूर्धलोमकृ
ष्णाजिनंनिधायतदुपरिउलूखलमुसलंनिधायव्रीहीनोप्यपलीतंदुरात्त्रिश्चुकीकुर्यात्॥त्रिः
प्रक्षाल्याग्नोश्रपयेत्॥ततोपरिस्तरणाद्बहिःउत्तरतोग्नेरंगारानपोह्यतदुपरिआज्यपात्रंनि
धाय॥बिलीनाज्यंनिक्षिप्यवामहस्तेदर्भगृह्यधृत्वाएकंउल्मुकंअवज्वाल्यदर्भगृह्यंनिक्षिप्य
उल्मुकेनचरुसहितंत्रिःपर्यग्निकरणंकुर्यात्॥उल्मुकंनिरस्यापउपस्पृश्य॥अंगारानग्नौक्षिपेत्॥

अंगुष्ठोपकनिष्ठिकाभ्यांपाणिभ्यांपवित्रेधृत्वा॥सवितुष्टेतिहिरण्यस्तूपःसवितापुरऽस्मिक्॥आ
ज्योस्ववनेवि०॥ॐसवितुष्टाप्रसवऽसुनाम्यच्छिद्रेणपवित्रेणवसोःसूर्यस्यरश्मिभिः॥प्राग्रसुनाति
सक्रुन्मंत्रेणहिस्तहंमीपवित्रेअद्भिःप्रोक्ष्याग्नेोप्रहरेत्॥बर्हिरास्तरणं॥भाज्यस्थापनं॥स्रुक्स्रुव
योःसंमार्जनं॥स्रुवबिलेदर्भाग्रेणत्रिःसमृज्य॥स्रुवपृष्ठेदर्भाग्रेणआत्माभिमुखंत्रिःसंमृज्य॥कु
शामूलेनपृष्ठादारभ्यबिलपर्यंतंत्रिःस्त्रिःसंमृज्य॥प्रोक्ष्यप्रताप्यघृतादुत्तरतस्थापयेत्॥तथै
वस्रुवंसमृज्यदर्भान्प्रोक्ष्याग्नेोप्रहरेत्॥स्रुवेणाज्यंगृहीत्वाचरुमभिघार्य॥उद्गुद्वास्य॥अग्न्या २०५
ज्ययोर्मध्येननीलाज्यादक्षिणतोबर्हिषिसंतरमासाद्यतन्मध्येएकंपात्रंनिधायाग्निमलंकुरु॥

विश्वाननइतितिसृणांआत्रेयोवसुश्रुतोग्निस्त्रिष्टुप्॥द्वाभ्यामर्चनंसोपस्थानेविनियोगः
ॐविश्वानिनोदुर्ग॰ऋक्२॥स्वस्ति॥पाणिनेध्ममादायाभिघार्य॥अयंतइध्मेत्यस्यजातवेदो
ग्निस्त्रिष्टुप्॥इध्माहवनेवि०॥ॐअयंतइध्मआत्माजातवेदस्तेनेध्यस्ववर्धस्वचेध्मवर्धयचास्मा
न्प्रजयापशुभिर्ब्रह्मवर्चसेनान्नाद्येनसमेधयस्व०॥अग्नयेजातवेदसइदं०॥स्रुवेणाज्यंगृही
त्वावाय्यदिशिमारभ्याग्नेयीपर्यंतं॥प्रजापतयेस्वाहेतिप्रजापतिमनसास्मरन्स्वाहेत्युच्चा
र्य॥एवंनैर्ऋतिमारभ्यत्वीशानीपर्यंतंपूर्ववत्स्रुत्वाप्रजापतयइदंनममेतित्यागः॥ततःचक्षु
षी॥ॐअग्नयेस्वाहेत्युत्तरे॥ॐसोमायस्वाहेतिदक्षिणेयथालिंगंत्यागः॥ततःपात्रांतरेधृतचरु

मुख्यस्य इदमग्नये॥इदमग्नीषोमाभ्यांइत्यभिमृश्य॥स्रुच्युपस्तीर्यमध्यात्पूर्वार्धाच्चदक्षि
णभागादवद्राय॥पंचावत्तीपंचावत्तीपश्चार्धादप्यवद्राय हविरवत्तेचाभिघार्यहृदिसव्यंकरंनि
धाय॥ॐअग्नयेस्वाहाअग्नयइदंत्यजामीत्युक्त्वा॥एवंद्वितीयभागाच्चोरवद्रायाभिघार्य॥
अग्नीषोमाभ्यांस्वाहेतिहुत्वास्रुक्कारेऽवस्तिंद्यग्निभ्यांहुतीर्याहुत्वापुनरुपस्तीर्यचरुभागहुत्वा
स्रुक्स्रुक्चवद्रायपंचावत्तीद्विरवद्रायद्विरभिघार्य॥यदस्यत्यस्यहिरण्यगर्भोग्निःस्विष्टकृदभि
धीतिः॥स्विष्टकृतेमेवि॥ॐयदस्यकर्मणोत्यरीरिचंयद्वान्यूनमिहाकरं॥अग्निष्टत्स्विष्टकृद्वि १०५
द्वान्त्सर्वंस्विष्टंसुहुतंकरोतुमे॥अग्नयेस्विष्टकृतेसुहुतहुतेसर्वप्रायश्चित्ताहुतीनांकामानांस्म

र्धयित्रेसर्वान्नःकामान्त्समर्धयस्वाहा॥अग्नयेस्विष्टकृतइदं॥त्रिसंधानेनरुदं॥रुद्रायपशु
पतयेस्वाहेतिहुत्वा॥पशुपतयेरुद्रायेदं॥अयाश्चेत्यस्यविमरोअयाअग्निःपक्तिः॥प्रायश्चि
त्ताज्यहोमेवि॥ॐअयाश्वाग्नेस्यनभिरस्तीश्वसत्यमुत्वमयाअसि॥अयासावयसाकृतो
यासन्हव्यमुहिषेयानोधाहिभेषजंस्वा॥अयसेग्नयइदं॥अतोदेवाइतिद्व्योर्मधातिथिराद्या
यादेवाद्वितीययाविष्णुर्गायत्री॥होमेवि॥ॐअतोदेवा॥देवेभ्यइदं॥इदंविष्णुर्विचक्र
मेत्रिधोरुदं॥व्यस्तसमस्तव्याहृतीनांविश्वामित्रजमदग्निभरद्वाजप्रजापतयऋषयोग्नि
र्वायुःसूर्यःप्रजापतयोदेवताः॥गायत्र्युष्णिगनुष्टुब्बृहत्यश्छंदांसि॥होमेविनि॥ॐभूः

स्वाहा॥अग्नयइ०॥भुवःस्वाहावायवइदं०॥स्वःस्वाहासूर्यायइदं०॥भूर्भुवःस्वःस्वाहाप्रजापतय
इदं०॥ब्रह्मापोषेनाःसप्तजुहुयात्॥सएव॥अनाज्ञातमंत्रहयस्यहिरण्यगर्भोग्निरनुष्टुप्॥अना
ज्ञातंयदाज्ञातंयज्ञस्यक्रियतेमिथु॥अग्नेतदस्यकल्पयत्वंहिवेत्थयथातथंस्वाहा॥अग्नयइ
यत्पाकत्रेत्याग्न्यस्त्रितोग्निस्त्रिष्टुप्॥होमेवि०॥यत्पाकत्रामनसादीनदक्षानयज्ञस्यमन्यते
मर्तासः॥अग्निष्टत्सोमाक्रतुविद्विजानन्यजिष्ठोदेवांऋतुशोयजातिस्वाहा॥आनयइदं०॥य
द्वोदेवाअभितपामरुतस्त्रिष्टुप्॥होमेवि०॥यद्वोदेवाअतिपातयानिवाचाचप्रयुतीदेवहेळनं॥ २०६
अरायोअस्मांअभिदुहुनायन्तेन्यत्रास्मन्मरुतस्तन्निधेतनस्वाहा॥मरुद्भ्यइदं०॥सांगतानि

ष्यर्थेसर्वप्रायश्चित्तंक०॥भूर्भुवःस्वःस्वाहेतिसर्वप्रायश्चित्तंच०॥ततोदर्शगृहीतंस्रुचिगृहीत्वा॥स
मुद्रादूर्मिरित्येकादशभिस्त्रिभिर्वापूर्णाहुतिंविद्युतिषेचाग्नयेकृताविष्णवेदेवेभ्यस्वाहेतिसंस्रा
वंहुत्वा॥सूत्रान्नक्रमकृत्वाप्रणीतापात्रेनर्हिषि॥पूर्णमसिपूर्णमिभूयाःसुपूर्णमसिसुपूर्णमि
भूयाःसदसिसन्मेभूयाःसर्वमसिसर्वमेभूया॥अक्षन्निरसिमामेसेष्ठाःइत्यभिमंत्र्य॥कुशैःप्रा
च्यांदिशिदेवाऋत्विजोमार्जयंतां॥दक्षिणस्यांदिशिमासाःपितरोमार्जयंतां॥प्रतीच्यांदिशिग्र
हाःपशवोमार्जयंतां॥उदीच्यांदिशिओषधयोवनस्पतयोमार्जयंतामितिदिक्षुप्रोक्षयेत्॥
आपोअस्मान्मातरःशुंधयंतुघृतेननोघृतपवःपुनंतु॥विश्वंहिरिप्रंप्रवहंतिदेवीरुदिदाभ्यःशुचि

एपूतएमि॥इदमापःप्रवहतयत्किंचदुरितंमयि॥यद्वाहमभिदुद्रोहयद्वाशेपउतानृतं॥सुमित्र्यानआ
पओषधयःसन्तिशिवाःसन्तुयास्मांद्वेष्टियंचवयंद्विष्मइतिभूमौ॥माहंप्र
जांपरासिचंयानःसयावरीस्थन॥समुद्रेवोनिनयामिस्वेपाथोअपीथे॥तिवामभागस्थितपल्यंज
लीनदभावेस्तोजेलोवापात्रंनिषिंच्य॥बर्हिषिनिनीयतेनात्मानंपत्नींचआपोहिष्ठेतित्रोक्ष्य॥प
रिस्तरणंविसृज्य॥अग्निंपरिसमुह्यपर्युक्ष्य॥विश्वानिनइतितृचेनाचेयित्वा॥मानस्तोकइतिविभू
तिंधृत्वा॥त्र्यायुषंजमदग्नेःकश्यपस्यत्र्यायुषंकंवे॥अगस्त्यस्यत्र्यायुषंनाभौ॥यद्देवा १२७
नांत्र्यायुषंदक्षिणस्कंधे॥तन्मेअस्तुत्र्यायुषंवामस्कंधे॥शतायुषंशिरसि॥ततःॐचमेस्वर

श्चमेयज्ञेपचतेनमश्च॥यत्तेन्यूनंतस्मैतऽउपयत्तेतिरिक्तंनस्मैतेनमः॥अग्नयेनमः॥स्वस्ति
श्चमेधांयमःप्रज्ञांविद्यांबुद्धिंश्रियंबलंआयुष्यंतेजआरोग्यंदेहिमेहव्यवाहनेतिनलाटेन
नामाभ्यांस्वस्तिकंकृत्वानमेत्॥ततोब्रह्मणेन्यस्मैकृत्वेषंवासहिरण्यंदत्वायस्यस्मृत्यासुक्ता
कर्मेश्वरार्पणंकुर्यात्॥इतिश्रीजगद्गुरुनारायणभट्टसूनुरामकृष्णभट्टात्मजकमलाकरभट्टकृत
स्थालीपाकप्रयोगसमाप्तः॥ ॥अथाग्निहोत्रसंसर्गप्रयोगः॥ ॥यदिपूर्वंगृह्यादेवद्वितीयादि
विवाहहोमकृतस्तदानेनैवाग्निनाद्वितीयादिपत्नीगृह्यकर्मसुसहाधिकारिणी॥यदिदेवाद्विन्याग्नेर्
द्वितीयादिविवाहहोमःकृतःस्तदाद्वितीयविवाहनिमित्तकरात्रादिव्रतांतेनिहोत्रसंसर्गःकार्यः॥

प्राणानायम्यदेशका०॥ममविवाहहुयेनजातयोःगृह्याग्न्योःसंसर्गमहंकरिष्येइतिसंकल्प्य॥उदक्
संस्थयोःहुयोःस्थंडिलयोःउपलेपादिपूर्वकंक्रमेणगृह्याग्निंप्रतिष्ठाप्य॥प्रथमाग्नावन्वाधानं
कुर्यात्॥अस्मिन्नग्निहुयसंसर्गकर्मण्यन्वाधानेक०॥अस्मिन्नित्यादिआज्यभागांतेत्रप्रधानं
अग्निंनवभिर्ऋग्भिःआज्याहुतिभिः॥शेषेणस्विष्टकृतमित्याद्याज्यभागांतेआद्ययापल्लासम
न्वारब्धोनवाहुतीर्जुहुयात्॥अग्निमीळेइतिनवानांमधुछंदाग्निर्गायत्री॥होमेवि०॥ऋगंतेअग्न
यइदं०॥ॐअग्निमीळे०मृत्विजं॥होतारं०तमंत्वा०अग्नयइ०१॥अग्निःपूर्वे०भृतं॥सदेवं०त्वंत्वा० १०८
अग्न०२॥अग्निना०रयिं॥यशसं०तमंत्वा०अग्नय०३॥अग्नेयंय०ज्ञसि॥सइद्देवे०निंत्वा०अग्ने

य०४॥अग्निर्होता०वरेण्यः॥रयिंदे०त्वा०अग्न०५॥यदंग०कविष्यसि॥तवेत्त०गिरःत्वा०६अग्न
॥उपत्वाग्ने०वयं॥नमो०सिंत्वा०अग्न०७॥राजंतम०रयिं॥वर्धमा०हंसत्वा०अग्न०८॥स
नःपितेव०भव॥सचःस्वान०येत्वा०अग्न०९॥ततःस्विष्टकृतादि॥ॐचमदित्युपस्थानोनेस
माप्य॥अग्नेत्वंनइतिचतसृभिर्वाउपस्थायतमग्निःअयंतेयोनिरितिसमिधमाधायकनि
ष्ठाग्नेप्रस्तरोहेतितंप्रस्तरोत्यअन्वाधानेपूर्ववदाज्यभागांतमुक्त्वाप्रधानंषडृचमग्निंचतु
र्गृहीताज्येनशेषेणस्विष्टकृतमित्याद्याज्यभागांतेस्रुचिस्रुवेणचतुर्वारंप्रभृतमाज्यंगृहीत्वाप
त्नीभ्यामन्वारब्धःतेनाज्येनावयवशःषडाहुतीर्जुहुयात्॥अग्नावग्निश्चरतिप्रविष्टऋषी

णांपुत्रोअधिराजएषः॥तस्मैजुहोमिहविषाघृतेनमोरेवानोमोमुहुरागधेमंमोअस्मांकंमोमुहुर्गधेहंस्वाहा॥अग्नयइ॰सर्वत्र॥अग्निनाग्निःकाण्वोमेधातिथिरग्निर्गायत्री॥अग्निनाग्निःसमिध्यतेकविर्गृहपतिर्युवा॥हव्यवाट्जुह्वास्यःस्वाहा॥अग्नय॰॥अस्तीदमधिमंथनामितितिस्रणांविश्वामित्रोग्निरुष्णिक्॥अंशेहेअनुष्टुभौ॥अस्तीदमधिमंथनमस्तिप्रजननंकृतं॥एतांविरूपत्नीमाभराग्निमंथामपूर्वथास्वा॰अग्न॰॥अरण्योर्निहितोजातवेदागर्भइवसुधितोगर्भिणीषु॥दिवेदिवईड्योजागृवद्भिर्हविष्मद्भिर्मनुष्येभिरग्निःस्वा॰अग्नय॰॥उत्तानायामवभराचिकित्वांस्यः प्रवीताहृषणंजजान॥अरुषस्तूपोरुशदस्यपाजस्कायास्त्रोवयुनेजनिष्टस्वाहा॥अग्नयइ॰ १०९

एत्यपरिष्टृणतेस्रुवेणोवाणज्याकृतयः॥ताभ्वा॥अग्निनाग्निःसमिध्यते॰ऋक्॥लेंत्यग्नेअग्निनेसांगिरसोविरूपोग्निर्गायत्री॥अस्तीदमितितृचः॥२॥पाहिनोअग्नेतितिस्रभिःप्रगाथोभर्गोग्निर्हविष्मतीअत्येसतोहविष्मतो॥पाहिनोअग्नएकया॥१॥पाहिविश्वस्माद्रक्षसोअराव्णःप्रस्मवाजेषुनोवा॥तामिधिनेदिष्ठंरेवतातयआपिंनक्षामहेहधेस्वाहा॥अग्नम॰॥आनोअग्नेवयोदधंरयिंपावकशंस्यं॥रास्वाचनउपमातेपुरुस्पृहंसुनीतीसयमस्तरंस्वा॰अग्नय॰॥सर्वत्र॥स्विष्टकृदादिहोमशेषंसमाप्यायतनेग्निंनिधाययथापूर्वंपरिचरेत्॥पत्न्योरेकायदिमृतादग्धातेनैवतांपुनः॥आदधीतान्ययासार्धमाधानविधिनागृहीति॥ ॥इतिकमलाकरभट्टकृताग्निहमसंसर्गःत्र

प्रयोगः॥ ॥अथाग्नेयेहोमविधिः॥ ॥ऋत्विगाद्यन्याभावेतुअग्नौचपातात्॥पूर्वहोमांतेपूर्वमपू
र्वमुक्ताप्रकारेणाग्निसमारोपणंकृत्वाहृतकनिष्टोत्सार्वाकृतनित्यक्रियोग्निंप्रतिष्ठाप्येदमुकाम
लोस्मृत्वाममनित्यहोमातिक्रमजन्यदोषपरिहारार्थंप्रायश्चित्तपूर्वकंअतिक्रांतहोमान्करिष्ये॥
इतिसंकल्प्यपरिसमूहनादिकृत्वाअग्नेःपश्चिमतःसपवित्रेपात्रेआज्यमासिच्यसवितुष्टेतिन्निरु
प्यस्रुवेणस्रुचिंचतुर्गृहीत्वा॥मनोज्योतिर्जुषतामाज्यंमेविछिंनंयज्ञंसमिमंदधातु॥याइष्टा
उषसोयाअनिष्टास्तासंतनोमिहविषाघृतेनस्वाहा॥ज्योतिषइदं॥इतोनित्यहोमवत्परिसमूह ११०
नादिकृत्वातंडुलान्संस्कृत्यसमित्प्रक्षेपांतेअतीतकालादारभ्यहेहेआकृतीकृत्वातत्कालहोमंच

कृत्वापरिसमूहनादिकंकृत्वाउपस्थानपूर्ववत्समापयेदिति॥ ॥इतिआग्नेयहोमप्रयोगः॥अ
थापत्कालेकर्तव्योहोमहव्यसमासप्रयोगः॥ ॥पूर्ववत्सायंकालिनाकृतिहव्यंकृत्वापर्युक्षणा
दिकंकृत्वाकिंचित्कालंनिमील्यपुनःपर्युक्षणादिसमित्प्रक्षेपणांतंकृत्वाश्वःकर्तव्यःप्रातराकृति
हव्यमपकृष्यकृत्वोपस्थानंकुर्यात्॥एकैकवेत्समित्सायंहोमादावेवउपस्थानेमंत्राः॥हविष्मा
तमितिपंचर्चस्यमूर्धन्यावामदेव्यःसूर्योवेश्वानरोत्रिष्टुप्॥उपस्थाय०॥ॐहविष्मांतमजरंस्व
र्विरितिविस्पष्टमाकृतंजुष्टमग्नौ॥तस्यभर्मणोभुवनायदेवाधर्मणेकंस्वधयापप्रथंत॥गीर्णभु
वनंतमसापगूळ्हमाविस्वरभवज्जातेअग्नौ॥तस्येदेवाःपृथिवीद्योरुतापोरणायन्नोषधीःस

ख्येअस्य॥देवेभिर्विषितोयज्ञियेभिरग्निस्तोषाण्यजरंबृहंते॥योभानुनापृथिवीद्यामुतेमामा
ततानरोदसीअंतरिक्षं॥योहोतासीत्प्रथमोदेवजुष्टोयंसमांजंनज्येनागृणानाः॥सपतत्रीत
रंस्थाजगद्यच्छत्रमग्निरकृणोज्जातवेदाः॥यज्जातवेदोभुवनस्यमूर्धन्नतिष्ठोअग्नेसहसोचने
न॥तंत्वाहेममतिभिर्गीर्भिरुक्थैःसयज्ञियोअभवोरोदसिप्राः॥एभिर्मंत्रैःप्राजापत्योचोपस्थ
यपर्युक्षणादिकंसकृत्कुर्यात्॥ ॥इतिआग्नेयेहोमविधिः॥ ॥अथसर्वद्विपक्षहोमः॥ ॥
ततःप्रतिपदिसायंकालेसमित्प्रक्षेपणांतंकृत्वाअकृतिप्रमाणेतंडुलान्पात्रद्वयेप्रतिपात्रंचतु
र्द्रोणावंगृहीत्वाहोमकालेप्रथमपात्रस्थान्अग्नयेस्वाहेतिसर्वान्हुत्वाततःप्रजापत्यर्थंगृ

हीतान्प्रजापतयेस्वाहेतिहुत्वोपस्थायंगजातंसकृत्कुर्यात्॥एवंद्वितीयायांप्रातराभ्यपर्वप्रा
तःपर्यंतान्प्रातर्होमान्करिष्येइतिसंकल्प्यहोमंकुर्यात्॥ ॥अथशेषहोमः॥पक्षमध्येवा
आपन्नआगामिचतुर्दशीसायंकालीनहोमांतांश्शेषहोमान्सायंसमस्येत्॥पर्वप्रात
र्होमांतांश्चप्रातःशेषहोमान्समस्येत्॥सर्वथासायंहोमप्रतिपत्प्रातर्होमंश्चपृथगेवहोत
व्यौ॥इतिशेषहोमः॥ ॥अथौपासनाग्निनाशेआयतनंगोमयेनोपलिप्यश्रोत्रियागा
राद्धृतअग्निंप्रतिष्ठाप्यदेशकालौस्मृत्वाममप्रमादादनुगताग्निपुनःसंधानंकरि॥आ
ज्यंसंस्कृत्यस्रुवंसमृज्यअयाश्चाग्नेस्येकाद्रुवेणाज्याकृतिंहुत्वासायंकालपर्यंतंपत्न्युप

वासेत्॥तदाश्वत्थोपजमानोपवासासायंकालेपूर्ववंनित्यहोमंकुर्यात्॥द्वादशाहपर्यंतंअय
मग्न्युत्सर्पन्तिः॥तदूर्ध्वंविवाहहोमः॥उत्थापणलोपप्रायश्चित्तेतुभूर्भुवःस्वःस्वाहेतिएकाज्याहु
तिर्जुहोति॥ ॥अथश्रवणाकर्माद्याःसप्तावशिष्टास्तेषुप्रथमंतावत्श्रवणाकर्मोच्यते॥
श्रवणाकर्मसर्पबलिंचभुक्त्वाकरणायुक्तेनउपवासिनेव॥श्रावण्यांपौर्णमास्यांपूर्वोण्हेस्वस्तिवाच
नंहस्तिश्वालंकृत्यादिवेवयवानांव्रीहीणांवाप्रस्थमितानांभर्जनेनधानाःकृत्वायेवेव्रीहिभिर्वा
सक्तुभिर्नवंकलशंप्रपूर्यवेकंतीरवमपिसंपाद्यतदुभयेनवेशिक्येनिधायबल्यर्थंप्राच्यादिशि २१२
अचिरेदेशंपरिगृह्यव्रीहीश्चरुपात्रेकपालेचसंपाद्यधानाःसमाधिरुत्वार्धाज्येनाक्ताःकृत्वैकपात्रे

निधायपात्रांतरेअनक्ताधाधानानिधायततोस्तमितेऔपासनंकृत्वाप्राणानायम्यदेशकालौ
स्मृत्वाममपुत्रपौत्रादीनांचरोगनिवारणसमस्तापापक्षयादिद्वाराश्रीपरमेश्वरप्रीत्यर्थंनित्यंविधि
रूपंश्रवणाकर्मकरिष्ये॥अन्वाधानेचक्षुषीआज्येनेत्येतमुक्त्वात्रप्रधानंअग्निंचतुर्धारंचरुणाअ
च्युतभोमंपुरोडाशेनअग्निमाशयाज्येनवाजिनदेवतांधानाइड्येणशेषेणस्विष्टकृदादि॥अग्ने
रुत्तरतःपूर्वास्तेषुदर्भेषुचरुस्थालीप्रोक्षणीपात्रंदर्वीस्रुवौप्रणीतापात्रंआज्यपात्रंइध्माबर्हि
षिकपालंशूर्पंकृष्णाजिनशम्योलूखलमुसलंदृषदुपलौवेदःमेक्षणंमदंतीआश्वयंउपवेषःएता
निपात्राण्यासाद्यततःपूर्णपात्रनिधानांतंकृत्वाचरुपुरोडाशंदेवपंचानांनूस्मीचतुरश्रंतुरोमुष्टी

निरूप्यतथैवतूष्णींप्रोक्ष्यअवघातादिकृत्वाप्रक्षाल्यचरुपुरोडाशतंडुलान्यथाभागंपृथक्कृत्वा
दषदुपलेपुरोडाशीयान्स्वयंपिष्ट्वाकृत्वाजिनेप्रस्कंघपत्न्योपषयित्वाचर्वर्थमग्नेर्दक्षिणभागे
स्थालीनिधायअग्नेरुदग्देशेउपवेष्यास्यप्रादेशमितयज्ञियकाष्ठेनद्वावंगारौपृथक्कृत्यतयो
रेकंवायज्ञेनिरस्यापस्पृष्ट्वावशिष्टंगारंकपालेनिधायतदुपर्यंगारान्निक्षिप्य॥पात्रांतरेपिष्टसं
काथंअपःप्रताप्यपिष्टभर्जनेनशरावेक्षालितेग्नौप्रताप्यस्वाग्नेनिहितेसपवित्रेपिष्टंसमिश्रपि
पिंडमभ्वशफलमात्रंकूर्माकृतिंकृत्वाकपालादंगारंवेदेनापोह्यस्थाल्यांतंडुलानोप्यकपालेपु
रोडाशंनिधायाद्भिःश्लक्ष्णीकाज्यंसंस्कृत्यआज्यादीनिचत्वारिहवींषित्रिःपर्यग्निकृत्वा॥पुरोडाश

मुल्मुकैःप्रताप्यतत्रैवसुश्रुतंश्रपयित्वातदुपरिसांगारंभस्मनिक्षिप्य॥हस्तेप्रक्षाल्याज्यमुद्
स्यादित्यवसंमार्जनानंतरंपुरोडाशोपरिस्थंभस्मवेदेनापोह्यचरुपुरोडाशावभिघार्यउद्गुद्वास्य
चरुंबर्हिष्यासाद्यतदुत्तरेपात्रांतरस्थतंडुलैकिकाज्येपुरोडाशंमज्जयेत्सकाशपृष्ठंवाकुर्यात्॥तदु
त्तरतःअक्तधानाआसाद्येध्माधानादाज्यभागांतेअवदानधर्मेणचरुमवदाय॥अग्नेनयेति
चतसृणामगस्त्योग्निर्लिष्टुप्॥श्रवणाकर्मप्रधानचरुहोमेविनियो॰ॐअग्नेनयसुपथारायेअ
स्मान्विश्वानिदेववयुनानिविद्वान्॥युयोध्यस्मज्जुहुराणमेनोभूयिष्ठांतेनमउक्तिंविधेम॥
अग्नेत्वंपारयानव्योअस्मान्त्स्वस्तिभिरतिदुर्गाणिविश्वा॥पूश्चपृथ्वीबहुलानउर्वीभवातोकाय

तनयायशंयोस्वा०॥अग्नेत्वमस्मद्युयोध्यमीवाअनग्नित्राअभ्यमंतकृधीः॥पुनरस्मभ्यंसुवि
तायदेवस्त्रांविश्वेभिरमृतेभिर्यजत्रास्वा०२॥पाहिनोअग्नेपायुभिरजस्रैरुतप्रियेसदनआशु
शुक्रान्॥मातेभर्यजरितारंयविष्ठनूनंविदन्मापरंसहस्वः॥४॥अग्नयइदंनममेतिसर्वत्रत्या
गः॥ततःसव्येनपाणिनादक्षिणंपाणिमुपस्तीर्यकृत्स्नंपुरोडाशमादायहिरभिघार्यपंचावत्ती
नुत्रिः॥ॐअच्युतायभौमायस्वाहेतिहुत्वा॥अच्युतायभौमायइदं॥ततःयस्मिन्भाज्येषु
पुरोडाशःस्थापितस्तद्राज्यंस्रुवेणादाय॥मानोअग्नेअवसृजोअघायाविष्यवेरिपवेदुरुनायै॥मादत्वतेदशतेमादतेनो ११५
याज्यहोमेवि॥ॐमानोअग्नेवसृजोअघायाविष्यवेरिपवेदुरुनायै॥मादत्वतेदशतेमादतेनो

माषितेसहस्रावन्यारास्वा०अग्नयइदं॥ततःस्वाज्यलोभाज्योपस्तृतेप्रागुत्काधानाद्दक्षिण्व
र्तीपयित्वाभिघार्य॥शंनोभवंतुवाजिनस्त्रिष्टुप्॥श्रवणाक०प्रधान०॥शंनोभवंतुवाजिनोहवे
षुदेवतातामितइवःस्वर्काः॥जंभयंतोहिंवृकंरक्षांसिसनेम्यस्मद्युयवनमीवाःस्वाहा॥अं
जलिनाकृत्वा॥वाजिभ्यइदं॥ततःअनभ्यक्ताधानपुत्रादिभ्योदत्वा॥चरुधानेकदेशतःस्रि
ष्टकृतंकृत्वाहोमशेषंसमाप्य॥ब्राह्मणान्भोजयेत्॥ ॥इतिकमलाकरभट्टकृतश्रावणा
कर्मप्रयोगः॥ ॥अथसर्पबलिः॥ श्रवणाकर्मानंतरंप्राणानायम्यदेशकालौस्मृत्वाम
मभार्यादिसहितस्यभौमादिसर्वसर्पेभ्यःसंभावितबाधापरिहारद्वाराश्रीपरमेश्वरप्री०॥

नित्यविधिरूपंसर्पबल्याख्यंकर्मकरिष्ये॥इतिसंकल्प्य॥दर्भमादायशिक्यस्थापितक
लशादितसक्तुभिःतामपूर्यगृहीत्वागृहान्निर्गत्यप्राच्यादिशिपूर्वपरिगृहीतंदेशमासाद्यप्रोक्ष्य॥
ॐसर्पदेवजनेभ्यःस्वाहेतिमंत्रेणदर्भस्थसक्तुप्राञ्जुखोनिक्षिप्यसर्पदेवजनेभ्यइदं॥ततःकृ
तांजलिः॥येसर्पाःपार्थिवायेअंतरिक्षायेदिव्यायेदिश्यास्तेभ्यइमंबलिमाहार्षंतेभ्यइमंब
लिमुपाकरोमीतिमंत्रेणसर्पानुद्दिश्यनत्वाबलिंप्रदक्षिणीकृत्यबलेःपश्चादुपविश्य॥ॐस ११५
र्पोसिसर्पतांसर्पाणामधिपतिरस्यन्तेनमनुष्यांस्त्रायस्वपूषनसर्पान्यज्ञेनदेवोस्त्वयिमा
संतंतयिसंतःसर्पोमाहिंसिषुः॥ध्रुवंदेवदत्तेपरिदामीतिज्येष्ठऋत्विग्नामगृहणंपुत्रादीन्य

रिदध्यात्॥एवंध्रुवसावित्रीतेपरिदामीतिअप्रतदुहितृः॥ततोध्रुवसत्यवतीतेपरिदामी
तिभार्यां॥ध्रुवनारायणशर्मणेपरिदामीतिआत्मानमंतेअन्यःकर्ताचेन्मापदस्थानेन
यजमाननामहितीयांतमुच्चरेत्॥ततःप्रतिपदमारभ्यप्रत्यवरोहणपर्यंतंसायंप्रातःकाले
पुनर्थेवदर्व्यांतिरेवसक्तुभिःअविदग्धेबलिंहरेत्॥तत्रनमस्कारपरिदानांतंकार्यं॥अथ
वाश्रावणप्रतिपदमारभ्ययस्मिन्नहनिप्रत्यवरोहणंमार्गशीर्षशुक्लचतुर्दश्यांपौर्णमा
स्यांवाक्रियतेतस्मादर्वाचीनरिक्तानीक्षासप्तथिभ्यांपरिगण्यतेषुयावंतःसायंप्रातःका
लास्तावंतोबलिंस्तदेवदद्यात्॥तदाचप्रथमबलिदानांतेनमस्कारपरिदानांतंसकृदेव

नत्रलेकं॥तरहस्तेखाखिलपरिदानंमुख्यःपक्षः॥इतिश्राद्धंतुउभयत्रतंत्रमेव॥बल्लेबलिदातृभ्रांतरा
केनापिव्यवधानंनकार्यमापरिदानात्॥इतिसर्पबलिः॥ ॥अथाभ्युजीकर्म॥ ॥अभ्यु
ज्यांपौर्णमास्यांअभ्युजीकर्मकर्तापूर्वेद्युरुपलेपनादिगृहंसमीकृत्यालंकृत्यापरेद्युःस्त्रीपुत्रा
दिसहितोभ्यंगादिकृत्वाप्रातरुपासनंकृत्वास्वदयिकंविधाय॥प्राणानामग्नेदेवाकालोस्मृत्वा
ममस्त्रीपुत्रादिसहितस्यन्यूनातिरिक्तविषयसंपूर्णतापूर्णानवसारनसिद्धिद्वाराश्रीपरमे-
नित्यविधिरूपंआभ्युजीकर्मकरिष्ये॥इतिसंकल्प्य॥चक्षुषीआज्येनेत्यंतेनप्रधानंपशु
तिंशिवंशांकरंचरुणापृषातकंपृषातकरूपेण।शेषेणस्विष्टकृतमित्यादिपात्रासादनेचरुस्था

ल्यासहपृषातकस्थाल्यात्यासादनंप्रोक्षणंच॥पूर्णपात्रनिधानंतेग्नेःप्रत्यक्कूपवित्रवतीभूर्वपु
श्चपतयेत्वाजुष्टंनिर्वपामीतिचतुरोमुष्टीन्निरूप्यतथैवप्रोक्ष्यावघातारिचरुभ्रपणांतेआज्यमिश्रं
पयःपृषातकाज्यंकृत्वाज्यंसंस्कृत्यपृषातकचरुभ्यांसहाज्यंपर्यग्निकृत्वाज्योद्वासनादिभा
ज्यभागांतेसुतारिभिरन्वारब्धःचरुमवदाय॥पशुपतयेशिवायशांकरायपृषातकायस्वाहेतिजु
त्वा॥पशुपतयेशिवायशांकरायपृषातकायेदं॥तंयजमानांजलावन्यःकश्चिदुपस्तीर्यस्रुवे
णपृषातकंहिरवदायाभिघार्योयजमानः॥ॐकृतंमेपूर्यतांपूर्णंमेमोपसदत्पृषातकायस्वाहे
तिअंजलिनाजुहुयात्॥पृषातकायेदं॥चरुपृषातकशेषेणस्विष्टकृतंजुहुयात्होमशेषंसमाप्य॥दग्ध

त्रीन्ब्राह्मणान्भोजयेत्॥ इत्याश्वयुजीकर्मप्रयोगः॥ ॥अथाग्रयणप्रयोगः॥ ॥दर्शादिपौर्णमास्यांपर्वणिवानदर्शभेकृत्तिकादिविशाखांतेषुरेवनक्षत्रेष्वन्यतमेचंद्रानुकूल्ये आग्रयणंकार्यं॥ प्रातरौपासनंकृत्वाभ्युदयिकंविधाय॥ प्राणानायम्येदेशकालौस्मृत्वाश्रीपरमेश्व॰ममरोगजरानिहत्तिश्रीयशोन्नप्राप्तिद्वारानित्यविधिरूपमाग्रयणंकरिष्येइति संकल्प्य॥अन्वाधानेचक्षुष्यंतेत्रप्रभानंरंद्राग्नीविभ्यांदेवान्द्यावापृथिव्योनवान्नचरुणा शेषेणास्विष्टकृतमित्यादिपूर्णपात्रनिधानांतेप्रत्यग्नेःपवित्रवतीभूर्पैतृष्मीत्रिभ्यतुरोमुखं निरूप्यनत्संख्ययाप्रोक्ष्य॥अवघातादिचरुश्रपणांतेआज्यसंस्कारादिआज्यभागांतेअव

२१७

दानधर्मेणचरुमवदाय॥ॐसजूर्ऋतुभिःसजूर्विधाभिःसजूरिंद्राग्निभ्यांस्वाहा॥इंद्राग्नी भ्यामिदं॰॥सजूर्ऋतुभिःसजूर्विधाभिःसजूर्विश्वेभ्योदेवेभ्यःस्वाहा॥विश्वेभ्योदेवेभ्यइ॰ सजूर्ऋतुभिःसजूर्विधाभिःसजूर्द्यावापृथिवीभ्यांस्वा॰॥द्यावापृथिवीभ्यामिदं॰॥तिस्र आकृतिरुला॥स्विष्टकृतंरुत्वा॥मध्यमहविःशेषवर्जंरुत्वावशिष्टचरोरेकदेशमग्नेपाणोग्र हीत्वा॥ॐप्रजापतयेत्वाजुष्टंगृह्णामिमत्यैत्वाश्रियेमत्यैयशसेमत्यमन्नाद्यायेतिमंत्रेण विहृत्यबर्हिःप्राङ्मुखोपविष्टोभिमृश्यदक्षिणेनपाणिना॥ॐभद्रंनःश्रेयःसमनैष्टदेवा स्त्वयावयंनसमशीमहित्वा॥सनोमयोभूःपितवाविशंहंत्रोमवद्विपदेशंचतुष्पदे॥इतिमं

त्रेणप्राश्यहिरण्यमन्त्रेव॥ॐअमोसिप्राणतद्दंत्रवीम्यमासिसर्वानसिप्रविष्टः॥समेज
एरोगमेंनुयमुरीरस्मामणधिमाकृथामरंइतिमंत्रेणनाभिमालभेत॥ततःपत्नीमध्यम
हविःशेषंअमंत्रकंप्राश्नीयात्॥ततःकर्मशेषंसमाप्यविंशतिषट्वाब्राह्मणान्भोजयेद
॥इदमाग्रयणंयदाश्वयुज्यांपौर्णमास्यांक्रियतेतदैककालत्वादाश्वयुजीकर्मणासमा
नतंत्रताभवति॥तत्राश्वयुजीकर्मप्रधानहोमंकृत्वाग्रयणप्रधानहोमः॥इत्योश्ववी
रुत्तरार्धदिकंस्विष्टकृतमिति॥आग्रयणमकृत्वानवान्नभक्षणस्यनिषिद्धत्वादुर्भिक्षे ११८
जीर्णधान्यानांनवधान्यभक्षणाधिकारार्थमत्रमासेपिकार्यं॥अनापरितुभुक्तएव॥

इत्याग्रयणप्रयोगः॥ ॥अथप्रत्यवरोहणं॥ ॥तत्रमार्गशीर्ष्यांपौर्णमास्यांचतुर्दश्यांवा
कार्यं॥कर्तादिवैवनिवेशनमलंकृत्यफलरहितधान्यतृणनिर्मितंकुंभंसंपाद्यनांदीश्राद्धंकृ
त्वास्तमितेऔपासनानंतरंदेशकालौस्मृत्वाममपुत्रादिसहितस्यजलस्थलचलसर्प
बाधानिरस्यभयहेमंतसौमनस्यसिद्धिद्वाराश्रीपरमेश्व॰नित्यविधिरूपंप्रत्यवरोहणाख्यं
कर्मिष्ये॥चक्षुषीआज्येनेत्यंतेत्रप्रधानंदिश्वेतंपायसेनेध्मसंनहनेनेत्यादिस्विष्टकृदूर्ज
पूर्णनिधानांतेष्टौमुष्टीन्तूष्णीमिरूप्यतथैवप्रोक्ष्यावघातादिपयसिचरुश्रपणाद्याज्य
भागांते॥सुतादिभिरन्वारब्धोवदाय॥ॐअपश्वेतपराजहिपूर्वेणचापरेणच॥सनचवारुणी

णिमाः सर्वेभ्यो राजबांधवीभ्यो स्वाहा॥ नमो वेभ्यो नमो अध्यागोरहिर्न धानकिंचन॥ श्वेताय वेरारायनमस्वा
हा॥ हयोरपिश्वेतायेदं॥ हेषायसाकृतीरैत्वा॥ अभयंनः प्राजापत्येभ्यो भूयात्स्वाहाग्निर्मीक्षमा
णोजपतिश्चिवानः सुमनाभवेतिहेमंतंध्यात्वा॥ पूर्वनिर्मितंकंअग्नेः पश्चात्स्त्रीयस्त्रीपुत्रा
दिसहितःतस्मिन्नुविश्य॥ स्योनामेधातिथिर्भूमिर्गायत्री॥ जपेद्विनि० इतिजपित्वा॥ अतो
देवाऽन० आकृष्णिरोदक्शिरस्कंवादक्षिणपार्श्वेनशयीतगृहिणोरनंतरंज्येष्ठक्रमेणतथैवशयी
रन॥ ततउत्थायोपविश्यप्राङ्मुखाः सर्वे॥ अतोदेवामेधातिथिर्देवागायत्री॥ जपेद्वि०॥ ज
पित्वाशयीतोत्थायउपविश्यदक्षिणामुखाः॥ अतोदेवाइतिपादंजपित्वाशयीतोत्थायो

पविश्यप्राङ्मुखाः यतोविष्णुर्विचक्रमेतिद्वितीयपादंजपित्वातथैवशयीतोत्थायोदङ्मुखउ
पविश्य॥ पृथिव्याःसप्तधामभिरितितृतीयपादंजपेयुः॥ ततः स्विष्टकृद्धोमंस्रुग्घृतप्रहरणादिक
मशेषंसमाप्यसर्वेयथाभाग्यंशयितोत्थायोदितेसूर्येकृतनित्यक्रियः॥ उदुत्यमितिनित्रयोद
शानांकण्वःपुत्रःप्रस्कण्वःसूर्योनवाद्यागायत्र्योंत्याश्चतस्रोनुष्टुभः॥ जपेवि०॥ चित्रंदेवा
नामितिगिरसःकुत्सस्त्रिष्टुप्॥ नमोमित्रस्येतिसूर्योमितपाःसूर्योजगतीदशमीत्रिष्टुप्॥ सू
र्योनोदिवस्पातित्यस्यसूर्यपुत्रःश्वक्षुःसूर्योगायत्री॥ आनोभद्राइतिराहुगणोगोतमोवि
श्वेदेवाःपंचाद्याःसप्तमीचजगत्यःषष्ठीविराट्॥ शेषास्त्रिष्टुप्॥ सविनोमिमीतामित्यस्य

त्रिर्विश्वेवाआद्यास्त्रिष्टभांत्येनुष्टभौ॥पवतेयेइतिमानवोनाभानिरिष्ठोविश्वेदेवाजगती॥
अंत्येत्रिष्टभौ॥एतानिसूक्तानिजपेयुः॥ततःत्रीनधिकान्ब्राह्मणान्भोजयित्वातैःस्व स्त्य
यनंवाचयीत॥इदमपिकर्मकेचिदुक्तापिकुर्वंतिसुक्तमुपवासीकृत्वापश्चाद्भुक्तान्दयी
नेति॥इतिकमलाकरकृतसत्यवरोहणप्रयोगः॥ ॥अथवंशपर्वणिकेवलपिंडपित्र्ययज्ञः॥
अमावास्यामपराह्णेऽपासनाग्निंप्रज्वाल्यप्राणानायम्यदेशकालौस्मृत्वापित्र्यतृप्ति
द्वाराश्रीपरमे॰ थेपित्र्ययज्ञेनयक्ष्येइतिसंकल्प्यआग्नेयाभिमुखोग्निंध्यात्वाअग्नेरग्नेयं
दिशिभाराभ्याःप्रदक्षिणमेवपरीत्यमुत्यआग्नेयाग्नेकेःदर्भैःपरिस्तीर्यअग्नेरीशान्यांवाय

व्यांआग्नेयाग्रकान्दर्भान्तीर्यतथैवपर्युक्ष्यआस्तीर्वेषुदर्भेषुएकैकपात्राणिसादयेत॥च
रुस्थालीशूर्पस्रुक्खलमुसलस्रुवध्रुवरुक्माजिनसरुदाछिन्नदर्भामेक्षणजलपूर्णकमंड
लुंचेतिपात्राण्यखिलान्येकैकशःआग्नेयसंस्थान्यासाद्यउत्तानानिकृत्वाकमंडलुजलेनप्रो
क्ष्यचरुस्थालीशूर्पंचासादयआग्नेर्दक्षिणतस्थितंव्रीहिमउकंदक्षिणतआरुह्यशूर्पे
निहितंस्थालीव्रीहिभिरापूर्ययथास्थालीमुखोपरिस्थःशूर्पंपतंतंतथानिमृज्यस्थाली
मुखप्रदेशतःपतितान्व्रीहीन्शकटेप्रास्याग्नेःपश्चिमदेशेवायव्यग्रीवास्तीर्णेरुक्माजिनेउ
खूखलेनिधायतत्रस्थालिस्थव्रीहीन्निधायआग्नेयाभिमुख्यातिष्ठंत्यापल्यावघातितान्

सकृत्फलीकृतावित्र्यसकृत्प्रक्षालितानजीवतेऽकुलान्श्रपयित्वाचरुममुद्दास्यैवाग्नेरे
कंप्रदीप्तमुल्मुकंगृहीत्वाअग्नेराग्नेयादिशिकृतेशुचिस्थंडिले॥येरूपाणिप्रतिमुंचमाना
असुराःसंतःस्वधयाचरंति॥परापुरोनिपुरोयेभरंत्यग्निष्टोकात्प्रणुदात्स्मादितिनि
धायपूर्ववत्सीसमूहनादिकृत्वाऔपासनातिप्रणीतयोरंतरास्त्यनंसयोन्नराणिदृषद्ग
हीतेनकुशमूलेनवाग्नेयसंस्थमाग्नेयाभिमुखो॥अपहतासुरारक्षांसिवेदिषद॥इतिले
स्वामुल्लिख्यतामभ्युक्ष्य॥सकृदाछिन्नेवस्तीर्य॥ध्रुवायांवित्रापितमाज्यमासिच्य॥अ २२९
नेर्दक्षिणतःकुशेष्वासाद्यस्रुवंचसमज्यंचरुमभिघार्यउद्गुद्वास्यऔपासनाग्नेःपश्चिम

तोदर्भेष्वासाद्यअंजनाभ्यंजनकाशिपूपबर्हणानिचदक्षिणतोनिधायाप्रदक्षिणमलंकृत्यप्राची
नावीतिरुध्ममभिघारितंपितृतीर्थेनतूष्णींमग्नावाधाय॥स्रुवेणाज्यमादायमेक्षणमुपस्ती
र्यमध्यासूर्वार्धिंगुष्ठपर्वमात्रंमेक्षणेनद्विरवदायपंचावत्तीश्चेसश्रार्धादध्यवदायहविरव
त्तंचाभिघार्य॥हृदिसव्यंनिधाय॥सोमायपितृमतेस्वधानमइतिअग्नेर्दक्षिणभागेपराचीन
पाणिनाऽऽस्वा॥सोमायपितृमतइदं॥ततःपूर्ववदवदाय॥अग्नयेकव्यवाहनायस्वधानमः॥
इतिद्वितीयंऽऽस्वा॥अग्नयेकव्यवाहनायेदं॥प्राचीनावीतीनेवतूष्णींस्रुचिमेक्षणमग्नाव
नुप्रहृत्यापस्पृष्वास्वधानमःशब्दवंतानेस्वाहाकारपंक्तस्त्रेतूपवीतीनेवमेक्षणानुप्रहृत्य

तंअग्नयेकव्यवाहनायस्वाहासोमायपितृमतेस्वाहेतिविशेषः॥ततःप्राचीनावीतीपूर्वहुतेरेखा
यांकमंडलुजलंपितृतीर्थेन॥शुंधंतांपितरःशुंधंतांपितामहाःशुंधंतांप्रपितामहाःइतिनिनये
त्॥ततःहुतशेषेणचरुणाधुवाज्येनत्रीन्पिंडान्कृत्वातस्योरेखायांपराचीनपाणिःपितृतीर्थे
नाग्नेयापवर्गंप्राचीनावीतिएतत्तेअमुकशर्मन्गोत्र॥येचत्वामत्राअनु॥तेभ्यश्च॥एवंपितृपित
महप्रपितामहयोःरपिपिंडत्रयंदद्यात्॥अत्रपितरोमादयध्वंयथाभागमावृषायध्वमितिसक्थ
सिंडाननुमंत्र्य॥सव्येनपार्श्वेनव्याहस्तोदङ्मुखोभूत्वायथाशक्तिप्राणान्नियम्याभ्याहृत्यअ १२२
मीमदंतपितरोयथाभागमावृषायीषतेतिपुनस्ताननुमंत्र्य॥चरुशेषमुपवीतीसवघ्रायाचम्म

शुद्धपाठ२

प्राचीनावीतीशुंध्वं।नामित्याद्यैस्त्रिभिःकमंडलुजलेनिनीयअमुकशर्मन्नभ्यंस्वेतित्रिषभ्यंज
नंतेलंघृतंवादर्भेणदत्वाअमुकशर्मन्नभ्यंस्वेतितथैवांजनंदद्यात्॥एतद्वःपितरोवासोमानोतोन्य
सितरोयुङ्ध्वमितिप्रतिपिंडंमंत्रावृत्त्यानववासोदद्यात्पंचौपिकंवयश्चेतत्सप्रकोष्ठंदद्यान्यतर
स्मिन्वादत्वाकशिपूपबर्हणोनिवेद्यहुतोजलिःरग्नेयाभिमुखःपिंडानुपनिषेत्॥ॐनमोवःपितरः
षेनमोवःपितरऊर्जेनमोवःपितरःशुष्मायनमोवःपितरोघोरायनमोवःपितोजीवायनमोवःपि
तरोरसाय॥स्वधावःपितरोनमोवःपितरनमएतायुष्माकंपितरइमाअस्माकंजीवाजीवंतंवहसं
तस्याम॥मनोन्वाऊवामहेनाराशंसेनसोमेन॥पितृणांचमन्मभिः॥आतएतुमनःपुनःक्रत्वे

क्षायजीवसे॥ज्योक्चसूर्यंदृशे॥पुनर्नःपितरोमनोददातुदैव्योजनः॥जीवंव्रातंसचेमहिरतिचतस्रभिरुपस्थाय॥पेतनःपितरःसोम्यासोगंभीरेभिःपथिभिःपूर्विणेभिः॥दत्तायास्मभ्यंद्रविणेहभद्रंयंचनःसर्ववीरंनियछतेतिपिंडेनाग्नेयमुखंसक्रुत्तानेनहस्तेनचालयेत्॥ततःओपासनांतिकंगछेत्॥ॐअग्नयेनमः॥ॐरक्षेवस्तंमाविदोष्टंविश्वमायुर्व्यश्नुतं॥क्रीळंतोपुत्रैर्नप्तृभिर्मोदमानोस्वेगृहे॥इत्योपासनसमीपंगत्वा॥यदंतरिक्षंपृथिवीमुतद्यांयन्मातरंपितरंवाजिहिंसिम॥अग्निर्मानस्मादेनसःप्रमुंचतुकरोतुमामनेनस्वमितिमंत्रेणवाग्यव्यदेशेस्थित्वोपतिष्ठेत्॥केचिद्ब्राम्यमपिमंत्राभ्यामग्न्युपस्थानमाहुः॥वीरमेदत्तपितरइतिनप्यमपिंडमादायसुपुत्रप्राप्तेपत्न्येप्रादायेत्॥ॐआध

१२३

त्तपितरोगर्भंकुमारंपुष्करस्रजं॥यथायमरपाअसदितिमंत्रेणदत्वाप्रादायेत्॥इतिरेअप्स्वितिप्रणीतिवाप्रक्षिप्यआसादितानांपात्राणांयानिअवशिष्टानितेषांदक्षसउत्सर्गः॥शिष्टंसहतृणेनेति॥ततोयज्ञोपवीतीपरिस्तरणंविसृज्य॥पूर्ववत्समूहनानिकृत्वाग्निंसंपूज्यकर्मेश्वरार्पणंकुर्यादिति॥इतिकृष्णपिंडपितृयज्ञः॥ ॥अथाखंडपर्वणिव्यतिषंगेनश्राद्धंकर्तव्यंव्यतिषंगोनामपिंडपितृयज्ञद्वयीश्राद्धयोःसहानुष्ठानं॥ ॥अथपिंडपितृयज्ञव्यतिषंगप्रयोगः॥ ॥देशकालौस्मृत्वाप्राचीनावीतिदक्षिणामुखःअस्मत्पितृपितामहप्रपितामहानांसपत्नीकानांतथामातामहप्रमातामहवृद्धप्रमातामहानांसपत्नीकानांगोत्राणांवस्वादिरूपाणांचपार्वणश्राद्धंपिंडपितृयज्ञंचव्यतिषंगेनयक्ष्येइतिसंकल्प्यतिलोदकादिस

१२४

णांतंकृत्वाविप्रान्संनिधायअग्निंध्यात्वापरिसमूहनादिध्मांधानांत्रांतंकृत्वाश्रपणपर्च्योचादिभस्मपर्यंतंकर्णीत्तरपाणिश्चाधनांतंकृत्वाब्रह्मयाननुज्ञाप्यक्रीयतामितिनेरुक्ते॥ततःध्मानासायामेक्षणानुप्रहरणांतंयज्ञंकृत्वाउपस्तृण्यध्रुवाज्येनपात्राभिघारणादिपरिवेषणांतंकृत्वाग्नौकरणशेषंअन्नंपितृपात्रेषुदत्वान्नदानाद्युत्तरापोशनांतेभुक्तशेषात्सर्वस्माद्धुतान्नेनचरुस्थालीस्थेनेनध्रुवाज्येनचपिंडार्थंतंमिश्र्यअग्रणीतोपासनयोरंतराले पूर्वस्मृतेषुदर्भेषुप्राचीनावीतीभूंध्येतोपितरंस्मृत्वाग्न्यपिंडदानादिपरेतनेतिमंत्रेणपिंडंचालनांते॥अग्नेतमध्येसग्निंचोपस्थायपत्न्येमध्येमोपिंडंप्राशयित्वापिंडान्विसृज्यपात्रोस्त

गंकृत्वाश्रात्यशेषंसमापयेदिति॥अत्रपित्रादीनांमध्येएकस्यद्वयोर्वाजीवनेपिंडदानकालेपूर्वोक्तेनस्वाहाकारांतेनमंत्रेणजीवतोद्देशेनाग्नौसव्येनपिंडहोमः॥मृतस्यापसव्येनपिंडदानं॥त्रयाणामपिजीवनेपिंडदानरहितोहोमोनएव॥पिंडपितृयज्ञोनभूमौपिंडदानं॥अथवानजीवंतिसतिरण्यादितिश्रुत्याअनारंभोवापितृयज्ञस्येति॥ ॥इतिकर्मकाकरभट्टकृतपिंडपितृयज्ञव्यतिषंगप्रयोगः॥ ॥अथाष्टकाप्रयोगः॥मार्गशीर्षादिचतुर्षुआमांतेषुमासेषुकृष्णपक्षेसप्तम्यादिअष्टम्यवसाध्यमष्टकाश्राद्धंकार्यं॥अत्रकौमाघमासएवकुर्यात्॥अथपूर्वेद्युश्राद्धं॥सप्तम्यांप्रातर्होमानंतरंनित्यादिसंकीर्त्यदर्शवत्सपत्नीकवर्गद्वयमुद्दिश्यनित्यविधिरूप

मष्टकाश्राद्धंकर्तुकामःपूर्वेद्युःश्राद्धंकरिष्ये॥ब्राह्मणनिमंत्रणादिकृत्वाविप्रान्तंनिधायाग्नि
समिंधानादिपरिषेचनांतंकृत्वास्थालीत्रयेश्रूर्पादीनिचपात्राणिपिंडपितृयज्ञवदासाद्यस्थालि
पुब्रीहिपूरणादित्रक्षालनांतेशुल्लोदनंतिलमिश्रोदनंपायसंचश्रपयित्वाज्यंनिरूपणाद्यनादिधृत्वा
ज्यंनिषेचनांतेचरुत्रयेणाभिघार्यउद्गुह्यास्याग्नेःपश्चिमतोदक्षिणंसंस्थंक्रमेणासाद्यत
क्षिणतोभ्यंजनाजनकरिपूपबर्हणंनिधायपक्वौदनादिकरशुंध्यंतंकृत्वाचरुत्रयंपात्रांतरेपृ
थक्पृथगुल्लृत्यघृताक्तंकृत्वाप्राचीनावीत्यग्नौकरिष्येतिताननुज्ञाप्यालंकृत्याग्नाविध्ममुप २२५
समाधायघृताज्येनभक्षणमुपस्तीर्यशुल्लोदनमध्यादंगुष्ठपर्वमात्रंभक्षणीनावदायपूर्वार्धेच

तथैवावदायतिलमिश्रोदनात्सायसाच्चतथैवावदायस्थालीत्रयेपृथक्पृथगभिघार्यअवत्तंस
रुरभिघार्य॥उदीरतामित्यष्टर्चस्यशंखःपितरस्त्रिष्टुप्॥पूर्वेद्युर्होमेविनि०॥ॐउदीरतामवरउस
रासउन्मध्यमाःपितरःसोम्यासः॥असुंयईयुरवृकाऋतज्ञास्तेनोवंतुपितरोहवेषु॥स्वधानम
इतिसर्वत्रभक्षणेनजुहुत्वा॥पुनःपूर्ववदवदाय॥ॐइदंपितृभ्योनमोअस्त्वद्यपूर्वासोयेपरा
सईयुः॥येपार्थिवेरजस्यानिषत्तायेवानूनंसुवृजनासुविक्षु०॥ॐआहंपितॄंसुविदत्रांअवि
त्सिनपातंचविक्रमणंचविष्णोः॥बर्हिषदोयेस्वधयासुतस्यभजंतपित्वस्तइहागमिष्ठः॥ॐ
बर्हिषदःपितरऊत्यर्वागिमावोहव्याचकमामृधंध्वं॥तआगतावसाशंतमेनाथानःशंयोरर

पोदधातस्वा॥ॐउपहूताःपितरःसोम्यासोबर्हिष्येषुनिधिषुप्रियासु॥तआगमंतुतइहश्रुवंत्वधिब्रुवंतुतेवंतस्मान्॥ॐआच्यजानुदक्षिणतोनिषद्येमंयज्ञमभिगृणीतविश्वे॥माहिंसिष्टपितरःकेनचिन्नोयदूआगःपुरुषतारयाम॥ॐआसीनासोअरुणीनामुपस्थेरयिंधत्तदशवृषमत्यायं॥पुत्रेभ्यःपितरस्तस्यवस्वःप्रयच्छतनइहोर्जंदधात॥ॐयेनःपूर्वेपितरःसोम्यासोनूहरसोमपीथंवसिष्ठाः॥तेभिर्यमःसंरराणोहवींष्युशन्नुशद्भिःप्रतिकाममत्तु॥एतेरपिस्वधानमोंतेरग्नोकरणस्थानेषऊर्जंत्वापितृभ्यइदंनममेतिसर्वत्रत्यागः॥यज्ञोपवीतीमेक्षणमग्नोप्रहृत्य॥अपस्पृश्याप्राचीनावीतिकृतशिष्टचरुत्रयपरिवेषणादिसंपन्नवचनोंतेरु

त्वाचरुत्रयशेषंपिंडार्थोधत्तान्नेषुनिक्षिप्यशेषंनिवेदनादिविप्रविसर्जनानंतरंदर्शवत्कृत्वातद्हेरवसपत्नीकवर्गद्वयस्यतिलतर्पणंकृत्वासंयतोदग्नशेषंनयेत्॥ ॥इतिसप्तमीश्राद्धं॥ ॥अथाष्टमीश्राद्धं॥अष्टम्यांप्रातर्होमानंतरंदेशकालौस्मृत्वाप्राचीनावीतीदर्शवत्सपत्नीकवर्गद्वयमुद्दिश्यनित्यविधिरूपमष्टकाश्राद्धंकरिष्ये॥इतिसंकल्प्यक्षणदानंतंकृत्वाअग्निंप्रज्वाल्यपुनर्देशकालौ०अष्टमीश्राद्धंकरिष्ये॥तत्रदेवतापरिग्रहार्थमन्वाधानंकरिष्ये॥चक्षुषीआज्येनेत्यंतेनप्रधानेअग्निमग्नीष्मेहेमंतवर्षाःस्तवसहोरात्रान्पृथिव्यंतरिक्षद्युदिक्दिशःप्रदिशउद्दिशःपोवियुत्॥आपोमरीचिधातारंसमु

इदंभूतंभविष्यत्ब्रह्माणिआदित्यावसुविश्वेदेवारुद्रमरुत्प्रजापतीन्परमेष्ठितंचरुणा३
णास्विष्टकृतमित्यादिपूर्णपात्रनिधानांतेपवित्रेऋषेअग्नेःप्रत्यङ्निधायअष्टाविंशतिमु
ष्टीनिरूप्यतत्संख्ययाप्राक्ष्यअवहननादिआज्यभागांतेअवदानधर्मेणावदाय॥अग्नये
तिमंत्रस्यागस्त्याऽनिष्टुप्॥अष्टकाहोमेवि०॥ॐअग्नेनयसुपथारायेअस्मान्०ऋक्॥अग्ने
त्वंपारयानव्योअस्मान्०ऋक्॥मंत्रद्वयेऽग्नय०॥ग्रीष्मोहेमंतऋतवःशिवोनोवर्षाःशि
वाअभयाःशरंनः॥संवत्सरोधिपतिःप्राणदोनोहोरात्रेकृणुतंदीर्घमायुःस्वा०ग्रीष्मोहेमं
तंवर्षाशरत्संवत्सरोहोरात्रेभ्यइदं०॥शंतापृथिवीशिवमंतरिक्षंद्यौर्नोदिव्यभयंनोअस्तु॥

१२७

विवादित्याःप्रदिशउद्दिशोनआपोविद्युतःपरिपांतुसर्वतःस्वाहा॥पृथिव्यंतरिक्षद्युस्कृप्रदिग्दि
वापोविद्युतइदं०॥आपोमरीचीःप्रवहंतुनोधियोधातासमुद्रोवहंतुपापं॥भूतंभविष्यद्भयं
विश्वमस्तुमेब्रह्माधिगुप्तंसरक्षरणिस्वाहा॥आपमरीचीधातसमुद्रभूतभविष्यत्ब्रह्मस
इदं०॥विश्वआदित्यावसवश्चदेवारुद्रागोप्तारोमरुतःसदंतु॥ऊर्जंप्रजामृतंपिन्वमानः
प्रजापतिमेपिपरमेष्ठीदधातुस्वाहा॥आदित्यवसुविश्वेदेवरुद्रमरुत्प्रजापतयइदं०॥प्रजाप
तेनत्वेतान्०प्रजापतयइ०॥एवंसप्तऋतूंस्त्वास्विष्टकृदादिशेषंसमाप्याब्राह्मणप्रोक्षा
दिकरिष्यंतेभोजितान्ब्राह्मणान्प्रदक्षिणंपर्युक्ष्यदक्षिणाग्रान्दर्भानास्ती

र्यदक्षिणेनहिरण्मयविधिना॥सोमायेतिमंत्राभ्यांआहुतिद्वयंहुत्वाएवंसर्वत्रजुहुयात्॥ततो
द्विजाहुतमन्नंपात्रेषुनिधायान्वाहार्यपिंडदानकालेविप्रस
मीपेपूर्वपश्चिमतःकृतेहेरेवबर्हिरास्तीर्यनोजनार्थान्नाहुतेन्नेनेवदर्शवत्पिंडदानादिविसर्ज
नांतेअग्न्युपस्थानवर्जंश्राद्धशेषंदर्शवत्समापयेत्॥तद्हरेवसपत्नीकवर्गद्वयस्यतिलतर्पणंकु
र्यादिति॥अत्राष्टम्यांकामकालौविश्वेदेवौ॥इतिशेषः॥ ॥इत्यष्टकाश्राद्धप्रयोगः॥ ॥अथ
नवष्टका॥ ॥देशकालौसंकीर्त्यप्राचीनावीतिदक्षिणामुखोजानुवाच्यपितृवर्गमातृवर्गमातामहसपत्नीकवर्गषड्यंतंनित्यविधिरूपमन्वष्टक्यश्राद्धंपिंडपितृयज्ञव्यतिषंगपार्वणविधाने

नान्नेनहविषासयःकरिष्येइतिसंकल्प्यदर्शवन्निमंत्रणांतंकृत्वादक्षिणाग्रवणेदेशेकृतेस्थ
ण्डिलेऔपासनाग्निंविधिवत्प्रतिष्ठाप्यपरिसमूह्यदक्षिणाग्रेदर्भैस्त्रिर्वीप्रदक्षिणंपरिस्तीर्य
दर्भेषुपात्रासादनदर्भैश्चरुस्थालीत्रयभूर्पोक्षणखलादयःपिंडपितृयज्ञवदासाद्यत्रिषुस्थालीषु
तंडुलपूरणादिविभज्यप्रक्षालनादिभिश्चोदनंतिलमिश्रोदनंपायसंचश्रपयित्वाकिंचिदोदना
ग्रहवंसंडलाख्यपात्रांतरेणादायसंभृत्याग्निमतिप्रणीयपूर्ववत्परिस्तीर्यअपास्तास्मिन्नेवा
ग्नयंपश्चिमापवर्गमुल्लिख्यप्रत्येकंसम्मृज्यैकेनसरुदार्वाछिन्नेनावस्तीर्यध्रुवायामाज्यंकृ
त्वादक्षिणतआसाद्यचरुत्रयंस्रुवेणाभिघार्योदगुद्वास्याग्नेःपश्चिमतःक्रमेणदक्षिणंस्था

मासाद्यदधिमिश्रयवपिष्टं मधुमिश्रंयवपिष्टंचपात्रत्रयेकृत्वाओपासनेअधिश्रित्याभिघार्य
उदगुद्वास्यपायसादक्षिणताआसाद्यभ्यंजनोंजनकशिपूपबर्हणानिदक्षिणतआसाद्यविप्र
पारप-ओचार्यमासादनकालेनवपात्राण्यासाद्य॥मातृद्वित्वेबहुत्वेवातत्संख्ययाकरिष्यंतेच
रुत्रयदधिमंथाश्चपात्रचतुष्टयेक्रमेणहविःपृथगुद्धृत्यघृताक्तंकृत्वाअग्नौकरिष्ये॥क्रियता
मितितेरुक्तेउपस्तृतेमेक्षणेचतुर्भ्योपिदृद्दिवदायहविष्यवत्तेचाभिघार्यआज्यंतंत्रंपूर्ववत्पु
रोडाशमेक्षणंप्रहृत्यादिवचनसंपन्नोतेपिंडार्थेघृतमिश्रात्पीयसवीन्नेषुहविश्चतुष्टयंमधुमंथां
श्चनिक्षिप्यशेषंनिवेद्यउत्तरापोशनंकृतेदर्भास्तेषुबर्हिषिभुंधतामितिवर्गत्रयस्यसतिलकमं

दकुंजलंनिनीय॥शुक्लांबरधराःशुक्लगंधायज्ञोपवीतिनः॥आसनोभिमुखासीना ज्ञानमुद्रानिरा
मुधाः॥वसवःपितरोरुद्राःस्तत्रपितामहाः॥पितुःपितामहाश्चोक्ताआदित्याबर्हिषिस्थिताः॥
तिपितॄन्ध्यात्वा॥आद्रामलकप्रमाणान्मधुसर्पिस्तिलयुतान्नवपिंडान्भुवाज्येनाभिघार्यएतत्त
स्यादिनालिंगंवर्गत्रयस्यदद्यात्॥स्त्रीपिंडेषुपूर्वसंभृतमंडंनिषिच्याग्न्युपस्थानंतंकृत्वावि
रमेत्पितरइतिविरम्यपितृश्रांतृहेनवर्गत्रयंप्रत्येकंप्रार्थ्यमध्यमपिंडत्रयंपत्नीप्राश्
यित्वापिंडोद्वासनादिदर्शवत्कृत्वातद्वदेववर्गत्रयस्यतिलतर्पणंकुर्यात्॥मातृद्वित्वेपिंडद्वा
नेसन्मातरोगोत्रयज्ञरेश्रीदेवसुरूपेपेचपुवामत्रानुरतिभस्मन्मात्राभ्यांगोत्राभ्योयज्ञदाश्री

ग्भ्योवसुरूपाभ्यांस्वधानमोनमः॥अभ्यंजनेअस्मन्मातरोअभ्यंजनाथामिनिद्विवारं॥एतद्दःपि
तरोवासइत्यादिनापितृश्राद्धानूद्देनमंत्रानुत्थावासोदद्यात्॥एवंपितामहीप्रपितामहीद्वेपि॥म
तृबंधुनेस्मन्मातरःस्वधानमःगयायामित्यादियुष्मानुन्नानु॥अभ्यंजनेअस्मन्मातरःअभ्यं
जनधमिति॥अभ्यंजनेअस्मन्मातरःअंजंधं॥वासोदानेएतद्दन्मातरोवासो॥॥यदिमासेशीर्षादि
चतुर्षुमासेषुमलमासस्तदाशुद्धमासएवाष्टकानुतुमले॥भाद्रपदापरपक्षेसप्तम्यादित्रिषट्
सुअष्टकावत्सर्वंकुर्यादितिहस्तिकारः॥हरदत्तस्तुतत्रैवपक्षेत्रयोदश्यांमघायुक्तायांसंकल्पवि
धानेनमाघ्यापकषोडश्यांश्राद्धं॥ ॥इतिश्रीजगद्गुरुनारायणभट्टसूनुरामकृष्णभट्टात्मज

कमलाकरभट्टकृताःअन्वष्टक्यनाःसंस्काराःसमाप्ताः॥ ॥शके१७६२संवत१८९७विरोधि
कृतनामसंवत्सरेमार्गशीर्षशुक्लपंचम्यांरविवासरेश्रीमाहाकालेश्वरसंनिधौअवंतिकाक्षेत्रे
पुस्तकंसमाप्तं॥ ॥अदृष्टदोषात्स्मृतिविभ्रमाद्वायदर्थहीनंलिखितंमयत्रा॥तंमार्जयित्वा
परिशोधनीयंकोपन्नकुर्यात्खलुलेखनस्य॥ ॥

LIBRARY

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

अ·क·क·
१३१

इतिसंस्कारप्रयोगकमलाकरपुस्तकंसमाप्तं॥

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

१३१